आवाहनं कथं देव तव सर्वगतस्य तु ।
संस्थापनं कथं नु स्यात् सन्निधानं कथं प्रभो ।
कस्मिन् मुखे समर्प्यं स्यान्नैवेद्यं ते वदस्व मे ।।१।।

अभोज्यं भोज्यमिति च कथ्यते ते निवेदितम् ।
भोज्यं केषामभोज्यं च केषां स्यात् तद्विवेचय ।।२।।

परशिव उवाच

आवाहनम्

देशान्तरप्राप्तिरूपावाहनं व्यापकस्य मे ।
न सम्भवेत् तथापि स्यात् कर्तुर्भावनया परम् ।।३।।

लिङ्गाद्यभिमते देशे यदभिव्यञ्जनं मम ।
तदेवावाहनमिति भावयस्व महामते ।।४।।

Rudradeva enquires —

O Lord! you are omnipresent. How to invoke you? How may the rite of *'Saṅsthāpana'* (installation) and *'Sannidhānam'* (keeping face to face) be performed? In which of your mouths the oblation should be offered? Kindly explain to me (1). Things offered to you are said to be eatable by some and unacceptable to others. Kindly explain to me as for whom it is acceptable and for whom it is not? (2).

Paraśiva replies —

O learned Rudradeva! Invocation from one place to the other is not possible as I remain all pervasive, but revelation in and through the specific *Liṅga* and desired *image* at a particular place occurs as per the conception of the devotee. You can conceive it as invocation (3-4).

संस्थापनम्

लिङ्गबेराद्यभिमतसदाशिवहृदम्बुजे ।
ममावस्थापनं यत्तत् संस्थापनमितीर्यते ॥५॥

संनिधान-संनिरोध-अवगुण्ठन-सकलीकरणानि

सन्निधानमिति प्रोक्तमात्मनोऽभिमुखीकृतिः ।
आपूजान्तं सन्निधानप्रार्थनं सन्निरोधनम् ॥६॥

कवचेनाच्छादनं तु यत्तदेवावगुण्ठनम् ।
हृदयादिन्यास एव सकलीकरणं मतम् ॥७॥

अमृतीकरणम्

पञ्चानां हृदयादीनां नानावर्णजुषामपि ।
मद्वर्णतानुसन्धानममृतीकरणं हि तत् ॥८॥

देवस्य कथं कुत्राभिमुखता

स्थण्डिले चरलिङ्गे च साधकाभिमुखोऽस्म्यहम् ।
प्रत्यग्वक्त्रस्तु कुम्भादौ स्थिरे द्वाराभिसम्मुखः ॥९॥

Installation is known as my invocation in the *Liṅga* which exists in the lotus heart of Sadāśiva and in the *image* (5).

Contemplating Śiva facing towards one's self is named as *'sannidhānam'*. Praying God to remain face to face infront of the devotee, till the worship is completed, is said *'sannirodhan'* (6). Protecting one's own body by chanting *Śivakavaca* (sacred hymns of God) is called *'avagunṭhana'*. Performing *nyāsa* on the point of heart etc. is known as *'sakalīkaraṇa'* (7).

Different letters of the original hymn are associated with the *nyāsas* of five points of the body viz. heart etc. Conceiving only my nature in those parts is called *'amṛtīkaraṇa'* (8).

I always remain infront of the devotee in and through the *'Sthaṇḍil'* and *Caraliṅga'*. I remain seated in the pot etc. towards west and I always exist in the fixed *image* facing towards the entrance (9).

पञ्चवक्त्रपूजाप्रकारः

प्रपत्तव्यं भोगमोक्षकामैर्मे दक्षिणं मुखम् ।
तस्मात् तदाभिमुख्येन कार्यं हि मम पूजनम् ।।१०।।

बाहुहृद्गुह्यचरणैः साकमूर्ध्वमुखं मम ।
आत्मनोऽभिमुखत्वेन प्रकल्प्यैव समर्चयेत् ।।११।।

भक्ष्यभोज्यान्नपानादि लेह्यं चोष्यमनेकधा ।
ऊर्ध्ववक्त्रे प्रदातव्यं यत्किञ्चिदिह चोदितम् ।।१२।।

आचारलिङ्गादीनां स्थितिः

पञ्चवक्त्रेषु नैवेद्यस्यार्पणं तद्विशिष्यते ।
सद्योजातः किलाचारो वामदेवो गुरुः स्मृतः ।।१३।।

अघोरस्तु शिवः प्रोक्तश्चरस्तत्पुरुषो भवेत् ।
ईशानस्तु प्रसादः स्याद्विशिष्टस्तु महानहम् ।।१४।।

प्रसादग्रहणम्

तस्मादनुदिनं भक्तः सर्वं भोज्यं च सर्वदा ।
षड्लिङ्गेभ्यः समर्प्यैव गृहणीयादवधानतः ।।१५।।

The devotee who aspires for both enjoyment and liberation should take refuge in my south face *(Aghora)*. Such person should worship me sitting infront of south face (10). Contemplating hands, heart, private part and feet along with my south face infront, devotee should reveredly adore me (11). Various kinds of food, drinks etc. which are the objects to be eaten, licked, sucked, have been prescribed in the scriptures as the offerings to Śiva, should only be offered to my upper mouth (12).

Surrendering offerings to the five faces of Śiva has got its unique glory. *Sadyojāta* face is of the nature of *Ācāraliṅga*, *Vāmadeva* of *Guruliṅga*, *Aghora* of *Śivaliṅga*, *Tatpuruṣa* of *Caraliṅga* and *Īśāna* is of the nature of *Prasādaliṅga*. *Mahāliṅga* which is unique from all of them and is only Me alone (13-14).

So, devotee should carefully accept the food regularly after submitting it to these six *liṅgas* (15).

निर्माल्यविचार:

मदीयभुक्तं निर्माल्यं भोज्यं चैव चतुर्विधम् ।
धर्ममर्थं च कामं च मोक्षं च ददते क्रमात् ।।१६।।

निर्माल्यं निर्मलं शुद्धं निर्मलत्वादनिन्दितम् ।
तस्मादभोज्यं निर्माल्यमशुद्धैरशिवात्मकैः ।।१७।।

अशुद्धात्मा शुद्धिलोभान्मद्भुक्तं पावनं परम् ।।
भक्षयन्नाशमाप्नोति रसभोक्ता यथा द्विजः ।।१८।।

जिह्वाचापल्यसंयुक्तः शैवसंस्कारवर्जितः ।
शैवनिर्माल्यभोजी चेद् रौरवं नरकं व्रजेत् ।।१९।।

मल्लिङ्गधारिणो लोके देशिका मत्परायणाः ।
मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु ।।२०।।

चण्डो नाधिकृत:

चण्डभोज्यं दुराधर्षं नान्यभोगाय कल्पितम् ।
बाणलिङ्गे चरे लोहे रत्नलिङ्गे स्वयम्भुवि ।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ।।२१।।

The offerings and the food accepted by me are of four kinds i.e. swallowable, devourable, gulpable and lickable which impart *dharma* (spirituality), *artha* (wealth), *kāma* (enjoyment) and *mokṣa* (liberation) respectively (16).

The *'nirmālya'* denotes, that which is undefiled, pure and can never be abused. Such, all pure offerings *(nirmālya)* are not eatable by impure and unauspicious persons (17). If the impure person, instead of controlling his temptation of being pure, eats pure offering, will go downward like that of a brāhmin having drunk the wine (18). If a greedy person and one devoid of Śaiva culture accepts the offerings *(nirmālya)* is sure to suffer the *'Raurava'* hell (extremely painful hell for the heinous criminals) (19). So the *'ācāryā'* who has worn *Śivaliṅga'*, remains absorved in Me and has taken my refuge, are eligible to accept My offering, no one else (20).

The offering (food) of *Caṇḍa* is considered to be very abhorrent and can never be offered to any body else. But *Caṇḍa* does not claim

असमर्प्य ग्रहणे दोष:

स्वेष्टलिङ्गे च यद्दत्तं चरुकं तन्न संशयः ।
पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधम् ।
आपद्यपि न भुञ्जीत यन्मह्यमसमर्पितम् ।।२२।।

निवेदितभोजने सायुज्यप्राप्ति:

मत्पूजापरमो नित्यं मन्निवेदितभोजनः ।
मद्ध्यानपरमो योगी मत्सायुज्याय कल्पते ।।२३।।

इति श्रीमकुटागमे क्रियापादे आवाहनादिविधिकथनं नाम पञ्चमः पटलः।।५।।

क्रियापादश्च समाप्तः।।

---

to have any right on the offerings of *vāṇaliṅga, Caraliṅga, liṅga* made of iron and gems, self-emanated *liṅga* and other images (21)

Offerings submitted to own *Iṣṭaliṅga* is considered to be immensely pure like the *'Caru'* (offering) offered to the *yajña* (sacrifice). There is no doubt in it. Devotee should never eat, even in emergency, leaves, flowers, fruits, water, cereals, drinks, medicines etc. without offering Me (22).

The devotee for whom my regular worship is supreme, always accepts the food offered to me in the worship, ever remains intensely immersed in meditating on me, surely attains the state of *'Sāyujya'* (23)

Here ends the fifth chapter of Kriyāpāda of Makuṭāgama enumerating the procedure of Invocation.

End of Kriyāpāda

❋ ❋ ❋

Notes and References

1. See note No. 8 of second chapter; *Prapañcasāra* (6.6)

2. The place cleaned for the purpose of sacrifice *(yajña)* is called *'Sthaṇḍil'* (*Amarkoṣa* - 2.7.18).

3. Śiva is of the form of five hymns. See *Mṛgendrāgama, vidyāpāda* (3.8-13) and *Mataṅga Pārameśvara, vidyāpāda* (4.14-15).

4. See *Karmakāṇḍa kramāvalī* (pp. 32-34) of Soma Śambhu for the description of the nature of *Caṇḍeśa* and the procedure of His worship.

* * *

Caryāpāda

Chapter-1

चर्यापादे प्रथमः पटलः

कैलासवासी भगवान् महादेवो महेश्वरः ।
महाकैलासनिलयं महाकारुणिकोत्तमम् ।।१।।

पञ्चपञ्चमुखं देवं पञ्चाशद्भुजमण्डितम् ।
पञ्चब्रह्ममयं शान्तं पञ्चकृत्यपरायणम् ।।२।।

परं शिवं समालोक्य प्रणम्य विनयान्वितः ।
पप्रच्छैवं कृपाविष्टो लोकानुग्रहकाङ्क्षया ।।३।।

रुद्र उवाच

अशेषजगदाधार निराधार परात्पर ।
सर्वतत्त्वादिभूत श्रीदेवदेव नमोऽस्तु ते ।।४।।

श्रीमद्दिव्यागमान्तेषु निगमान्तेषु च स्फुटम् ।
शाम्भवव्रतमादिष्टं भवता शीघ्रमुक्तिदम् ।।५।।

God Rudra, out of compassion and for the welfare of the world, approaches and most humbly bows unto Paramaśiva, the greatest of gods, the Lord of lords, the resident of great *Kailāśa,* the supreme among all the merciful beings residing on the mount *Kailāśa,* endowed with twenty five faces[1] and fifty hands, of the nature of *Pañcabrahma* hymn, immutable but ever engrossed in performing five-fold actions and enquires (1-3).

Rudra enquires —

O the infinite substratum of the world, self sustained, transcendental, the substance of all elements, the God of the gods! I bow unto you (4). You have very clearly stated the procedure and nature of *Śāmbhavavrata* in the later portion of divine Āgama and Nigama which is the immediate bestower of liberation (5). Please tell me the ritualistic procedures of the last rites of devoted worshippers, the

ये द्विजास्तदनुष्ठानतत्परा लिङ्गधारिणः ।
अवसानविधिं ब्रूहि तेषां सद्भक्तियोगिनाम् ।।६।।

परशिव उवाच

साधु पृष्टं त्वया वत्स भक्तलोकोद्दिधीर्षुणा ।
शृणु वक्ष्यामि भक्तानामवसानविधिं परम् ।।७।।

शाम्भवव्रतनिष्ठानामवसानविधिः

येनैव संस्कृतः शीघ्रं दीक्षितो मुक्तिमाप्नुयात् ।
येनैव संस्कृतः शीघ्रं दीक्षासाफल्यमश्नुते ।
येनैव संस्कृतो यायादभक्तोऽपि परां गतिम् ।।८।

शाम्भवव्रतनिष्ठानामिष्टलिङ्गाङ्गसङ्गिनाम् ।
कथितो मत्पदावाप्त्यै शिवमेधविधिः श्रुतौ ।।९।।

शिवमेधशब्दनिर्वचनम्

शिवे मयि प्रविष्टानां मेध आराधनात्मकः ।
शिवमेध इति ख्यातः करणीयो मुमुक्षुभिः ।
विशिष्टः पितृमेधोऽयं शिवमेध इति स्मृतः ।।१०।।

---

wearers of *Iṣṭaliṅga*, the *dvija* who always remains absorbed in performing this sacred rite *(Śāmbhavavrata)* (6).

Paraśiva replies —

O son! you have asked an apt question in view of the emancipation of the devotees. I am elucidating the best possible procedure of the last rites for the devotee. Please listen carefully (7). The person who is initiated and endowed with the procedure, attains liberation early. Oriented with this rites one is able to achieve the success of *'Śāmbhava'* initiation easily. Even non-devoted person also reaches the ultimate goal (8). For the devoted observer of *'Śāmbhavavrata'* and wearer of *Iṣṭaliṅga* on the body, the procedure of *'Śivamedha'*[2] has been enunciated in the scripture to attain my feet (9).

For those who have entered into the closest unison with Me *(sāmarasya)*, adoration itself is said as *'medha' (Śivamedha)*. Aspirant

भक्तिज्ञानविहीनोऽपि शिवपदं प्राप्नोति

सर्वस्य प्रतिशिवेति भूमिस्तोयस्य इत्यपि ।
श्रुतयो विदधत्येव समाधिं भक्तियोगिनाम् ।।११।।

भक्त्या ज्ञानेन हीनोऽपि युक्तोऽपि महतैनसा ।
सोऽपि मत्पदमागच्छेच्छिवमेधेन संस्कृतः ।।१२।।

मद्भक्तौ च मदर्चायां मज्ज्ञाने शाम्भवव्रते ।
यो मुक्तिसिध्दिं सन्दिग्धे स ध्रुवं नरकं व्रजेत् ।।१३।।
शाम्भवीये व्रते चैव तदन्त्येष्टिविधावपि ।
अविश्वासपरो मूर्खो नरकान्नहि निःसरेत् ।।१४।।

लिङ्गाङ्गिदेहदहने दोषः

शाम्भवव्रतिनो देहं दहेद् यो मूढचेतनः ।
नरके दह्यते सोऽयं सर्वदा यमकिङ्करैः ।।१५।।

मद्भक्तानां मुमुक्षूणां संस्कारायैव देहिनाम् ।
पितृमेधे समाख्यातः समाधिविधिरुत्तमः ।।१६।।

---

must observe *'Śivamedha'*. The specific kind of *'Pitṛmedha'* is known as *'Śivamedha'* (10).

Scriptural utterances like *'Sarvasya pratiśiva'* (Śiva is ever present) and *'bhūmistoyasya'* (earth is the substratum of wordly things) indicate the procedure of the *samādhi* for the devoted worshipper (11). It is supposed that the person observing only *'Śivamedha'* attains my feet notwithstanding being devoid of devotion and knowledge (12). If a person is doubtful about the attainment of liberation, even after maintaining devotion in Me, performing worship, possessing my knowledge and observing *'Śāmbhavavrata'*, is sure to suffer the hell (13). The non-believer and unwise person can never be relieved from the hell if he does not keep faith in the prescribed ritualistic last rites for the observer of *'Śāmbhavavrata'* (14). The attendants of 'Yama' burn the unwise person in the hell who inflames the body of the observer of *'Śāmbhavavrata'* on pyre (15). Superior procedures of *'samādhi'* in the

नृणां कर्मैकसक्तानां पुनरावृत्तिशालिनाम् ।
दहनोपस्कृतः प्रोक्तो ह्यवसानविधिर्मया ।।१७।।

लिङ्गाङ्गसङ्गिनां वत्स चानावृत्तियुजां सताम् ।
समाध्युपस्कृतः प्रोक्तो ह्यवसानविधिः परः ।।१८।।

ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तु वा ।
चीर्णव्रतो यदि मृतस्तस्य देहं न दाहयेत् ।।१९।।

शाम्भवव्रतनिष्ठानां प्रेतत्वं नास्ति

शाम्भवव्रतनिष्ठानां प्रेतत्वं नहि विद्यते ।
प्रेतत्वेन वियुक्तस्य कर्मलोपो न शङ्क्यते ।।२०।।

अपसव्यादिनिषेधः

लिङ्गभावयुजामेषामपसव्यं न युज्यते ।
अतः प्रेतक्रियाः सर्वाः शाम्भवेषु न योजयेत् ।।२१।।

---

last rite for my devotees who aspires for liberation, has been illustrated in the *'Pitṛmedha'* (16).

I have described the funeral to be performed with the fire for those who keep themselves attached in the worldly affairs and consequently remain within the cycle of transmigration (17). O son! for the devotee who always wears *Iṣṭaliṅga* and does not come within the cycle of birth and death, the highest procedure of last rite namely *'samādhi'* has been advocated by Me (18). The body of the person who has observed *'Śāmbhavavrata'*, should never be cremated in fire after his demise whatever he might be, celibate, householder, retired from the active life or sage (19).

The devoted observer of *'Śāmbhavavrata'* does not get the *spirithood*. So, the question of redemption from the *spirithood* does not arise (20).

For the devotee who always remains immersed in the contemplation of *Liṅga*, *'apasavya'* (transferring the sacred thread from left to right shoulder while performing the last rites) is not necessary. So, no ritual to remove the *spirithood* of the devotee who

वीरशैवानां समाधिसंस्कार:

समाधिर्मोक्षधर्मोऽयं सर्वधर्मापवादकः ।
समाधिसंस्कृते तस्माद्धर्मलोपो न शङ्क्यते ।।२२।।

समाधिसंस्क्रिया साक्षान्मत्सान्निध्यप्रदायिनी ।
दहनं प्रथितं लोके पितृलोकैकसाधकम् ।।२३।।

मदीयभक्तगात्राणां समाधिर्विहितो मया ।
ये त्वविश्वासिनो लोके मदुक्तविधिषु ध्रुवम् ।
न बहिर्निःसरेयुस्ते कदाऽपि नरकार्णवात् ।।२४।।

इति श्रीमकुटागमे चर्यापादे शाम्भवान्त्येष्टिप्रशंसा-
नाम प्रथमः पटलः ।।१।।

---

keeps himself ever engrossed in observing *śāmbhava* practice, is performed (21).

'Samādhi' is the supreme procedure for the attainment of liberation. It is considered to be exceptionable for the other rites and rituals. So, once endowed with *'Samādhi'*, there is no question of lapse regarding the religious practices (22). *'Samādhi'* is the most apt means that imparts proximity of Mine. The popular custom of the world to cremate the body in fire, is only the means of achieving the sphere of the ancestors *(Pitṛloka)* (23). The only last rite of my devotee has been narrated by Me is *'Samādhi'*. Those who do not maintain faith in the means narrated by Me, are surely unable to come out of the sea of hell (24).

Here ends the first chapter of Caryāpāda of Makuṭāgama
praising the last rites to be performed for
the 'Śāmbhava-devotee'.

Notes and References

1. Indian scriptures have been divided by the Śaiva philosophers as *Loukik* (empirical) *Vaidik* (scriptural), *Ādhyātmik* (spiritual), *Atimārga* (transcendental) and *Mantra* (hymn). Each is again divided into five and

thus twenty five in total number. Here it seems that twenty five faces are being imagined for the preaching of the twenty five kinds of the scriptures.

2. The famous *Pitṛmedha* rite of vedic scriptures is named here as *'Śiva-medha'*. See *Śukla Yajurveda, Mādhyandin saṁhitā*, ch. 35. *"Dharma shastra kā itihāsa"* P.V. Kane (Part III, pp. 1114-1122).

***

Chapter-2

द्वितीयः पटलः

रुद्र उवाच

परमेश्वर सर्वात्मन् सर्वकारण शाश्वत ।
उच्चिक्रमिषुणा सद्यः कर्तव्यं तन्निबोध मे ।।१।।

परशिव उवाच

उच्चिक्रमिषोर्भस्मस्नानादिकम्

उच्चिक्रमिषुराश्वेव मय्यावेशितचेतनः ।
कर्तुं दानादिकं स्नानमाग्नेयादिकमाचरेत् ।।२।।

धृतधौताम्बरो भूम्यामासीनश्च कुशासने ।
उद्धूलनं त्रिपुण्ड्राणि धृत्वा भूत्या यथोदितम् ।
रुद्राक्षान् बिभृयादेव शिरःकण्ठकरादिषु ।।३।।

भस्मरुद्राक्षधारी तु यश्चापि म्रियते यदि ।
सोऽपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः ।।४।।

God Rudra enquires —

O the supreme God, the soul of the universe, the cause of all, the eternal! what is the immediate duty for the person who is ready to leave the body through the procedure of *'utkramaṇa'*? Kindly enlighten me (1).

Paraśiva replies —

If the devotee of Mine is about to expire, then he should be bathed as per the procedures of *'Āgneya'* etc. for the fulfilment of the alms etc. (2). He should draw the *'Tripuṅḍra'* after observing the process of *'Uddhūlana'*[1] with sacred ashes, wearing the washed clothes and sitting on the ground on the seat of *Kuśā*. Then he should wear *Rudrākṣa* on the head, neck and hands etc. as per the rules laid down (3). If any body, whatever species he might belong, expires, besmearing the sacred ashes and wearing *Rudrākṣa,* is sure to attain the status of *Rudra,* what to speak of human being (4). Knowing the symptoms of

उत्क्रान्तिमथ विज्ञाय निनित्तैराशुभाविनीम् ।
आत्मन्यग्नीन् समारोप्य या ते अग्नेति मन्त्रतः ।
भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत् ।।५।।

अविदितकालस्य पुत्रेण दानादिकं कर्तव्यम्

अथाविदितकालः सन् समुत्क्रान्तिं लभेत चेत् ।
तत्पुत्र आशु कुर्वीत आत्मारोपं यथाविधि ।।६।।

आत्मन्यारोपितस्यास्य वह्नेः प्रशमनाय वै ।
षडध्वशुद्ध्यैः कर्तव्यो ह्यप्सु होमस्त्वनन्तरम् ।।७।।

आत्मन्यग्नीन् समारोप्य होममप्सु विधाय च ।
हिरण्यं च यथाशक्ति दद्याद् गां लिङ्गमेव च ।।८।।

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं सम्प्रददे धेनुमिमामुत्क्रान्तिसंज्ञिताम् ।।९।।

पुनरावृत्तिरहितशिवसायुज्यसिद्धये ।
इदं सम्प्रददे तुभ्यं शिवलिङ्गं सुपावनम् ।।१०।।

दानसाद्गुण्यकामेनावश्यं देया सुदक्षिणा ।
हीनं दक्षिणया सर्वं व्यर्थं भवति शङ्कर ।।११।।

'utkrānti', one, after installing the fire in his own soul reciting the hymn *"yā te Agne"*[2], should besmear his body with the sacred ashes uttering the hymn *"Agnih"*[3] etc.. (5).

If death *(samutkrānti)* occurs without premonition, then his son should observe the procedures as per rule, by installing fire within himself (6). To quench the fire enkindled within self, he, after having purified the six *adhvas*, should perform sacrifice *(yajña)* in the water (7). After appeasing fire within and performing sacrifice in the water, he should donate gold, cow and *Liṅga* as per the capacity (8). At the critical time of demise (son utters) 'I donate the cow namely *'utkrānti'* with the view to peaceful passing away of the soul (9). For the attainment of eternal union with Śiva (wherefrom there is no return), I offer this holy *Śivaliṅga* to you' (10). *Dakṣiṇā* (last gift for the purpose

लिङ्गदानमहिमा

ब्रह्माण्डकोटिदानेन यत्फलं भवतीश्वर ।
तत्फलं समवाप्नोति शिवलिङ्गप्रदानतः ।।१२।।

स्थूलदेहविलापनम्

सर्वाङ्गलिङ्गसाहित्यं नित्यमा प्रायणादपि ।
भावयेदवधानेन शिवसायुज्यसिद्धये ।।१३।।

आयुषः प्राणमित्येवं तत्त्वान्यपि च योजयेत् ।
यथाक्रमं कारणेषु स्थूलदेहं विलापयेत् ।।१४।।

देहच्छिद्राणि गगने श्वसने श्वाससन्ततिम् ।
ऊष्माणं ज्वलने वारिण्यसृक्पूयकफादिकम् ।।१५।।

अस्थिमांसादिकठिनभागान् भूमौ यथोदयम् ।
विलाप्यैवं स्थूलदेहं सूक्ष्मं चापि विलापयेत् ।।१६।।

---

of accomplishment of the worship) must be offered for the fulfilment of the alms. O Śaṅkar! everything becomes futile without offering *'dakṣiṇā'* (11).

O god! the result of the offering of crores of universes is equal to the result of donating *Śivaliṅga* alone (12). Devotee should regularly and attentively conceive the existence of *Liṅgas (Ācāraliṅga, Guruliṅga* etc.) in different parts of the body till alive with the purpose of attaining the state of *'Śiva-sāyujya'* (enjoying the closest union with Śiva) (13). He should gradually consign the gross body to their respective causes by observing the procedure of *'Tattva-saṅyojana'* and reciting the hymn *'āyuṣah prāṇam'*[4] etc. (14). The apertures of the body in space *(ākāśa)*, the stream of inhilation and exhilation in the air *(vāyu)*, heat of the body in the fire *(agni)* and the blood, pus and phlegm are to be immersed in the water *(ap)* (15). The hard parts viz. the bones and the muscles etc. are to be consigned to the earth. Likewise, the subtle body should also be infused after submerging the gross one (16).

सूक्ष्मदेहविलापनम्

शूलिन् सूक्ष्मशरीरस्य विलापनमपि श्रृणु ।
करणप्रेरकत्वेन देवानां तत्र मुख्यताम् ।
आलोक्य तत्रेन्द्रियाणि विषयैः सह योजयेत् ।।१७।।

वक्तव्यसहितां वाचं वह्नाविन्द्रे सशिल्पकौ ।
पाणी विष्णौ पदे गत्या रत्योपस्थं प्रजापतौ ।
पायुं विसर्गसहितं मृत्यौ शर्व विलापयेत् ।।१८।।

दिशासु सह शब्देन श्रोत्रं स्पर्शैः सह त्वचम् ।
वायौ दिनेशे रूपेण चक्षुषि प्रविलापयेत् ।।१९।।

रसेन वरुणे जिह्वां गन्धैर्घ्राणं सहाश्विनोः ।
मन्तव्येन मनश्चन्द्रे बुद्धिं बोध्यैश्चतुर्मुखे ।
रुद्रे सहाहङ्कर्तव्यैरहङ्कारं विलापयेत् ।।२०।।

भोक्तृत्वादिविकाराद्यैः क्षेत्रज्ञे सह योजयेत् ।
चित्तं चेतयितव्यैश्च गुणकार्योक्तदैवतैः ।
विकारवन्तं तमपि मयि ब्रह्मणि योजयेत् ।।२१।।

O the bearer of Triden! please listen to the procedure of immersion of the subtle body. Knowing the importance of the gods of the concerned sense organs that provide inspiration to them, one should attribute the senses and their objects to the respective gods (17). O Śarva! one should consign the sense organ of mouth along with the speech to fire, hands with all skills to *Indra,* feet along with movement to *Viṣṇu,* sex organ along with the sexual activity to *Prajāpati,* and anus along with excreta to death *(yama)* (18); ear along with the sound to the gods and direction, skin along with touch to the air, eyes along with form to the sun (19); tongue along with the taste to *Varuṇa*, nose along with the smell to *Aśvinī Kumāras,* mind along with the thinking process to moon, intellect along with the knowing process to the four faced *(Brahmā)* and ego along with all the ego based activities to *Rudra* (20). All attitudes of enjoyment and its observations are to be submitted to '*Kṣetrajña*'. Thus *citta* along with all its objects of consciousness is to

क्षित्यादिभूताहङ्कारमहदव्यक्तसंज्ञिनाम् ।
विकारहेतुभूतानां स्वस्वहेतौ लयः क्रमात् ।।२२।।

सर्वाङ्गलिङ्गसाहित्यभावनम्

सर्वाङ्गलिङ्गसाहित्यं नित्यमा प्रायणादपि ।
भावयेदवधानेन मम सायुज्यसिद्धये ।।२३।।

सर्वेष्वङ्गेषु सर्वत्र सर्वदा सर्वतोमुखम् ।
लिङ्गं गुरूपदेशेन ज्ञातं यत्तत् प्रकाशते ।।२४।।

एकमेव परं लिङ्गमङ्गेऽस्मिन् सुप्रतिष्ठितम् ।
सर्वतोमुखमाभाति नामरूपक्रियात्मना ।।२५।।

इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे ।
भावलिङ्गं तथैवास्मिन्नात्माङ्गे सुप्रतिष्ठितम् ।।२६।।

हृदयाङ्गे महालिङ्गं श्रोत्राङ्गे तु प्रसादकम् ।
त्वगङ्गे चरलिङ्गं तु दृगङ्गे शिवलिङ्गकम् ।।२७।।

---

be surrendered to their respective like natured divinities, lastly evolving *citta* should also be united with Me as *Brahmā* (21). Evolutes like Earth *(Pṛthvī)*, five gross elements *(Mahābhūtas)*, Ego *(Ahaṅkāras)*, Intellect *(Mahat)* and *Prakṛti (Avyakta)* etc. should be assumed as being merged gradually in their respective causes (22).

One should contemplate the association of the various parts of the body with *Liṅga* as long as the life (soul) remains in the body, for the attainment of My *'sāyujya'* (the most intense relation) (23). Realization of the manifestation of all pervasive *Liṅga* in all parts of the body, occurs only on account of the knowledge imparted by *Guru* (24). The only eternal, transcendental *Liṅga* that exists in the body, is revealed in the form of name, form and action etc. (25).

Iṣṭaliṅga is established in outer, *Prāṇaliṅga* in the self (26). *Mahāliṅga* is existing in the heart, *Prasād liṅga* in the ear, *Caraliṅga* in the skin and *Śivaliṅga* in the eyes (27). Thus *Guruliṅga* resides in the.

जिह्वाङ्गे गुरुलिङ्गं तु नासिकाङ्गे तथैव च ।
आचारलिङ्गमश्रान्तं सुप्रतिष्ठितमेव हि ।।२८।।

यथा ज्ञानेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम् ।
तथा कर्मेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम् ।।२९।।

अप्रतर्क्यमनिर्देश्यं चेतनावागगोचरम् ।
सर्वशक्त्यपि सर्वज्ञं सच्चिदानन्दलक्षणम् ।।३०।।

प्रायश्चित्तसमाचरणम्

भावयन्नेति तद्भावं भावपूतेन चेतसा ।
गणानुज्ञां गृहीत्वाऽतः प्रायश्चित्तं समाचरेत् ।।३१।।

सर्वजन्मार्जितानीह पातकानि महान्त्यपि ।
लिङ्गजङ्गमगुर्वङ्घ्रितीर्थप्राशनतस्तथा ।
नश्यन्ति तत्क्षणादेव नात्र कार्या विचारणा ।।३२।।

महाशैवव्रतस्थानां मद्भक्तानां विशेषतः ।
न निष्कृत्यन्तरं मुख्यं मत्तीर्थप्राशनादृते ।।३३।।

---

tongue, *Ācāraliṅga* is at rest in the nose (28). Existence of *Liṅga* in the motor organs should also be conceived respectively as that of sensory organs i.e. *Prasādaliṅga* in the *vāk* or mouth, *Caraliṅga* in the hands, *Śivaliṅga* in feet, *Guruliṅga* in anus and *Ācāraliṅga* in genital organ are to be conceived (29). Śiva is trans-rational, indeterminate, beyond the consciousness and speech, omnipotent, omniscient and of the nature of existence-consciousness and bliss (30).

The devotee who conceives such *Paraliṅga* and attains the purity of consciousness should observe the atonement (for the sins have been committed) with the permission of *gaṇas* (ardent devotees of Śiva) (31) The acceptance of the sacred water washing the sacred feet of *Guru, Liṅga* and *Jaṅgama* immediately annihilate even the heinous sins committed in the numerous previous births. There should not be any doubt in it (32). For the observer of Śaiva discipline, specially for my devotee, no atonement is superior to the acceptance of the sacred water

अन्त्यकाले तु यस्याऽऽस्ये दीयते मत्पदोदकम ।
सोऽपि सद्गतिमाप्नोति यश्चाचारबहिष्कृतः ।
तथा मन्त्रामधेयानि कीर्तयेदवधानतः ।।३४।।

शिवनामस्मरणम्

शिव शिव शिव चेति व्याहरन् वै त्रिवारं
त्यजति निजतनुं यः स्वायुषोऽन्त्यक्षणेऽस्मिन् ।
भवति भवभयानां छेदकः पूर्वशद्बो
न भवत इतरौ तौ कल्पितात्मोपकारौ ।।३५।।

मरणसमये मन्त्रश्रावणम्

ततश्च कर्णमन्त्राणि श्रावयेयुः सुतादयः ।
षडक्षरं दक्षकर्णे निषदश्चैव शाश्वतीः ।।३६।।
तत उत्क्रान्तिवेलायां कर्पूरं ज्वालयेदपि ।
अणुः पन्थेत्यर्चिरादिगत्यर्थं मन्त्रमुच्चरन् ।।३७।।

*इति श्रीमकुटागमे चर्यापादे उच्चिक्रिमिषुकर्तव्य-
विधिर्नाम द्वितीयः पटलः ॥२॥*

---

from my feet (33). At the time of expiry, if the sacred water of my feet is given to the person — even non-virtuous – is sure to achieve the exalted status. He also should recite my name attentively (34). The person who recites the name of 'Śiva' thrice before leaving the body, for him only the utterance of the first word annihilates the fear of the world and the rest two utterances cause the upliftment of the soul (35). Thereafter, the son of the devotee should recite the hymns to his ears. The *saḍakṣarī* and the *upaniṣad*, the bestower of the eternal excellence should be enchanted to the right ear (36). Then camphor should be enkindled during the time of expiry *(utkrānti)* reciting the hymn *'aṇuh panthāh'*[5], so that the devotee may be able to achieve the elevated status like *'arci'* etc. (37).

Here ends the second chapter of Caryāpāda of Makuṭāgama illustrating the duties to be performed during the time of expiry (utkrānti).

* * *

Notes and References

1. See *'Aṣṭāvaraṇa vijñāna'* (pp. 40-57) for the *'bhasmasnāna'* (bath of the sacred ashes), *bhasmoddhūlan* (besmearing of the sacred ashes) and *Tripuṅḍra* (Three lines of the sacred ashes).
2. "या ते अग्ने रुद्रिया तनूस्तया नः पाहि। या ते अग्ने दुराशया .... तस्यास्ते स्वाहा"। (*Taitt. Saṁhitā* 1.2.11.2).
3. "अग्निरिति भस्म। वायुरिति भस्म। जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म।।" (*Bhasmajābālopaniṣad* 1.3).
4. "आयुषः प्राणं संतनु। प्राणादपानं संतनु" (*Tatt. Saṁhitā* 1.5.7).
5. "ऊणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तोमयैव। तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमिति उर्ध्वं वियुक्ताः।। (*Bṛhadāraṇyak up.* 4.4.8).

* * *

Chapter-3

तृतीयः पटलः

रुद्र उवाच

विश्वातीत जगद्योने सर्वाधार परात्पर ।
दृष्टोत्क्रान्तिं ततः कर्त्रा किं कर्तव्यं वदस्व मे ॥१॥

परशिव उवाच

उत्क्रान्तासुं परीक्ष्याथ कर्ता संशुद्धचेतनः ।
स्नात्वा धृतत्रिपुण्ड्रश्च रुद्राक्षसमलङ्कृतः ॥२॥

कर्माधिकारसिद्ध्यर्थं गणानुज्ञा

कर्माधिकारसिद्ध्यर्थं कृत्वा गणनमस्कृतिम् ।
तदभ्यनुज्ञां गृह्णीयाद् यथाशक्तिप्रदानतः ॥३॥
मृताहदानं तत्सर्वपर्वदानाद् विशिष्यते ।
तद्यथाशक्ति दातव्यं द्रविणं पितृहितैषिणा ॥४॥

Rudradeva enquires —

O the trans–empirical, the cause of the world, the substratum of all, the transcendental! What duty should be performed by the authorised person after understanding the time of demise *(utkrānti)*? Please tell Me (1).

Paraśiva replies —

After confirming the death, the authorised person, with pure mind, should take bath, wear *Rudrākṣa* and draw *Tripundrak* (2).

He should seek permission for the accomplishment of the last rite after bowing to the *gaṇas* and donating as per capacity (3). The alms offered at the time of last rite is considered to be special from other religious occasions. So, one should donate as per his capacity to the wellwisher of his father (4).

दोषप्राप्तौ प्रायश्चित्तं

ऊर्ध्वोच्छिष्टादिसम्प्राप्तौ प्रायश्चित्तं समाचरेत् ।
प्राजापत्यप्रतिनिधिं दद्याद् द्रव्यं यथोदितम् ।।५।।

खट्वायां मरणे प्राप्ते प्राजापत्यं समाचरेत् ।
गां वा हिरण्यं दद्याच्च तद्दोषविनिवृत्तये ।।६।।

निशि कृष्णे च पक्षे च मरणे दक्षिणायने ।
ताः सूर्या इति वै षड्भिर्हुत्वा कुर्याच्च संस्क्रियाम् ।।७।।

इष्टलिङ्गसंस्कारः

लीनप्राणशरीरं तु श्रीरुद्रेणाभिषिच्य च ।
भस्मरुद्राक्षगन्धाद्यैरलङ्कृत्येष्टलिङ्गकम् ।।८।।

करे निवेश्य सम्पूज्य पेटिकायां निधाय च ।
विमाने तद्वपुः स्थाप्य सर्वमङ्गलनिस्वनैः ।।९।।

If there is any defilement like *'ūrdhvocchiṣṭa'*[1], then adequate atonement is to be performed. For this purpose, items representing the *'Prājāpatya-vrata'* should be offered (5). If the death occurs on the cot, *Prājāpatya-vrata*[2] is to be performed. Cow or gold should be donated to condone the above defilement (6). If the death occurs during the night, dark fortnight and also when the sun is in southern hemisphere *(Dakṣiṇāyan)*, last rites are to be performed with the oblation uttering the six hymns like *'tāh sūryāh'* etc. (7).

After the expiry, the rite of bathing for the deceased, should be performed enchanting the *Rudrādhyāy* of the scripture and worship of *Iṣṭaliṅga* should be performed with the sacred ashes, *Rudrākṣa* and incenses etc. (8). Then the *Iṣṭaliṅga* should be adored putting it on the hand and then should keep It in the box (container of the *Liṅga*). The body along with the *Iṣṭaliṅga* should be carried on the carrier *(vimāna)* to the place of *samādhi* with the auspicious sounds (9).

विमानवाहकनामानि

महोक्षो वृषभश्चैव नन्दीशो नन्दिकेश्वरः ।
एतैश्च नामभिर्युक्तांश्चतुरो वाहकान् वृणेत् ।।१०।।

शिवारामं प्रति नयनम्

शिवारामं प्रति नयेत् तैर्वृतैर्वाहकैः सुतः ।
अग्रे मङ्गलनिस्वानाः सम्भारास्तदनन्तरम् ।
पूजाद्रव्याणि संस्कर्ता विमानं बान्धवाः क्रमात् ।।११।।

निवीतिनो वहेयुस्तद्विमानं वाहका अमी ।
निषदः प्रब्रुवाणाश्च गच्छेयुर्बान्धवा अपि ।।१२।।

इति श्रीमकुटागमे चर्यापादे समाधिदेशप्रापणं नाम तृतीयः पटलः ।।३।।

The bearers of the *vimāna* are named as *Mahokṣa, Vṛṣabha, Nandīśa,* and *Nandikeśvara*. They are appointed to carry the *vimāna* (10).

The son should go to the place of *samādhi* with the adored carriers of the deceased. All the players of the auspicious sounds should go first, then the items meant for the rituals and worship, after that performer of the rites, lastly the *'vimāna'* followed by the friends should proceed on (11). The carriers of the *'vimāna'* should be *'nivīti'*[3] (they should put their sacred thread tied up with *Iṣṭaliṅga* in the neck instead of on the shoulder). All the kins should proceed on, enchanting the *upaniṣad* (12).

Here ends the third chapter of the Caryāpāda of Makuṭāgama describing the gradual position of the procession leading to the place of samādhi.

Notes and References

1. The significance of the word *'ūrdhvocchiṣṭa'* is not clear here. It seems that if there is any *Pañcak* or *Tripuṣkar yoga* during the time of the death, then the rite for appeasing the evil effect has been advised to be performed.

2. *Prājāpatya* is a kind of atonement. See *Manusmṛti* (11.211); P. V. Kane : *'Dharmaśāstra kā itihāsa* (Part 3, pp. 1090-1091).

3. "उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे। प्राचीनावीतमन्यस्मिन् निवीतं कण्ठलम्बितम् ।।" In this verse of *Amarkośa* (2.7.49) three positions of the sacred thread has been described. The sacred thread hanging on the right side is called as *'upavīta' (savya)*, on the left side *'prācīnāvīta' (apasavya)* and on the neck *'nivīta'*. Present verse refers to the third position.

***

Chapter-4

चतुर्थः पटलः

रुद्र उवाच

अनन्तशक्तिकलित लीलावैभवशोभित ।
भूनिक्षेपविधानं तदशेषं ब्रूहि मे विभो ॥१॥

परशिव उवाच

समाधिस्थलनिर्देशः

शिवालयसमीपे वा शिवारामस्य वाऽन्तिके ।
शिवतीर्थसमीपे वा विल्वमूले नदीतटे ।
समाधिं कारयेत् प्राज्ञो वक्ष्ये तल्लक्षणं शृणु ॥२॥

समाधिरचनाप्रकारः

चतुरस्रं पञ्चपादं दीर्घं विस्तारमेव च ।
खातं नवपदं त्वाद्यं सोपानं चैकपादकम् ।
द्वितीयं द्विपदं प्रोक्तं तृतीयं त्रिपदं तथा ॥३॥

वेदिका च त्रिपादेन तस्य दक्षिणतो दिशि ।
त्रिकोणं च प्रकर्तव्यं त्रिपादं दीर्घमायतम् ॥४॥

Rudra enquires —

O the effulgent immanent principle, endowed with the various manifestations of the innumerable powers! kindly explain to me the detailed procedure of *'bhūnikṣepa'* (1).

Paraśiva replies —

The *samādhi* of a wise person is to be located either near the temple of Śiva, in the garden adjacent to it, near the pilgrimage of Śiva, beneath the *bilva* tree or on the bank of a river. I am describing their characteristics (2).

The shape of *samādhi* should be square; length and breadth should be equal to five steps (walking steps) and depth of nine walking steps. First stair will be of one step, second of two steps and third of three steps (3). A triangular hole of the size of three walking steps

खात्वा मा वो रिषदिति गोमयेनोपलिप्य च ।
रङ्गवल्याप्यलङ्कृत्य गायत्र्या प्रोक्ष्य वारिणा ।।५।।
अग्निरित्यादिना भस्मशय्यां सम्यग् विधाय च ।
विकीर्य पत्रपुष्पाणि चतुर्दिक्षूपरि ह्यधः ।।६।।

समाधौ देहनिक्षेपः

षडक्षराणि विन्यस्य मूलेनैवाभिमन्त्र्य च ।
नदत्सु तूर्यवृन्देषु पुष्पवृष्टौ चरत्यपि ।।७।।
चित्तिः पृथिव्यग्निरिति चानुवाकान् समुच्चरन् ।
स्वस्तिकासनरूपेण तच्छरीरमुदङ्मुखम् ।
शम्भो हव्यं गृहाणेति निदधीत बिले तदा ।।८।।

भस्मलवणमृत्तिकापूरणम्

ऋतं तप इति पठन् भस्मना लवणेन च ।
मृत्तिकाभिः पूरयेताप्याकण्ठं तदनन्तरम् ।।९।।

---

should be dug within and towards the south corner of the *samādhi*. A small dias or platform of the size of the three walking steps both in length and breadth should be made within that triangular hole (4). Then the *samādhi* should be anointed with the cow-dung reciting the hymn "*mā vo riṣat*"[1] and decorated with the *'raṅgavallī'* (traditional artistic paintings using the ingredients like the powder of the rice and colours etc.) and sprinkle the water reciting the hymn of *Gāyatrī* (15). Flowers should be showered everywhere of the *samādhi* after preparing the bed of the sacred ashes as per the rule laid on enchanting the hymn *'agnih'*[2] etc. (6).

The place should be sanctified uttering the original five syllable hymn *(pañcākṣara)* along with the six syllable hymn. In the midst of various musical sounds of *tūrya* etc. and showering the flowers reciting the hymn *'cittih, pṛthivyagnih'*, the body of the deceased devotee should be placed in a sitting position of *'svastikāsan'* facing towards the north and pray to God, 'O Śambhu, kindly accept it as your offering' (7-8).

सर्वस्य प्रतिशिवेति मूर्धानं दिव इत्यपि ।
सजलं भस्म मृत्पिण्डं पितुर्मूर्धनि निक्षिपेत् ।
ततश्च पूरयेद् गर्तं भस्मना मृत्स्नयापि च ।।१०।।

सचैलं स्नानं केशश्मश्रुवपनं च

वस्त्रं सन्धापयेदादौ ततः स्नानं समाचरेत् ।
सचेलस्तु पुनः स्नात्वा केशश्मश्रूणि वापयेत् ।।११।।

ब्राह्मणस्वर्णघातादिपापानि विविधानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम् ।।१२।।

मेरुमन्दरतुल्यानि पापानि विविधानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम्।
इति मन्त्रं परिपठन् केशश्मश्रूणि वापयेत् ।।१३।।

शिखिलक्षणम्

अग्नेरिव शिखा यस्य विद्याज्ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वानितरे केशधारिणः ।।१४।।

इति श्रीमकुटागमे चर्यापादे समाधिविधिकथनं
नामं चतुर्थः पटलः ।।४।।

The *samādhi* be filled upto the neck of the deceased with sacred ashes, salts and earth reciting the hymn *'ṛtam tapah'*[3] (9). The sacred ashes mixed with water and earthen ball should be kept on the head of the father (by the son) reciting the hymns *'sarvasya prati Śiva'* and *'mūrdhānamdivah'*[4]; then the pit should completely be filled up with the sacred ashes and the earth (10).

Samādhi is to be covered with the clothes and bath should be taken. Then he (son) should get his hairs, beard and mustache shaved after observing *'sacail'* bath (11). The various sins like the killing of brahmin and stealing of gold etc. remain attached to the hairs. So, I am stating the procedure of *'keśavapan'* (12). The heinous crimes comparing with the height of *Sumeru* and *Mandārācal* (mountains) reside making the hairs as their base. So, one should clean the hair and beard reciting the above two hymns (13).

The crest (crown of the head) of the Śaiva devotee is of the nature of knowledge, powerful as the flame of the fire. Such devotee is known as the real *'Śikhī'* — the bearer of the crest. Others only bear the hairs in the form of crest (14).

Here ends the fourth chapter of the Caryāpāda of Makuṭāgama illustrating the procedure of preparing the 'Samādhi'.

***

Notes and References

1. "मा वो रिषत् खनिता यस्मै चाहं खनामि वः। द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम्।।" (*Mādhya.* 12.95).
2. See note no. 3 of second chapter for the full hymn.
3. "ऋतं तपः सत्यं तपः श्रुतं तपः शान्त तपो दमस्तपः शमस्तपो दानं तपो यज्ञस्तपः।।" (*Mahānārāyaṇopaniṣad*, 8th anuvāk).
4. "मूर्धानं दिवसो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्तां पात्रं जनयन्त देवाः।।" (*Mādhya.* 7.24).

***

Chapter-5

पञ्चमः पटलः

रुद्र उवाच

अनादिनिधनानन्तकल्याणगुणवारिधे ।
भूनिक्षेपानन्तराणि कृत्यान्यपि निबोध मे ।।१।।

परशिव उवाच

समाधिस्थले सवृषभलिङ्गस्थापनपूजनम्

निर्वृत्तवपनः स्नात्वा भूतिरुद्राक्षभूषितः ।
गणानुज्ञां गृहीत्वाऽथ दिव्यरूपाप्तये पितुः ।।२।।

पञ्चभिर्नवभिर्वाऽथ वृषभैरभिशोभितम् ।
पितृनामाङ्कितं लिङ्गं समाधौ स्थापयेत् सुतः ।।३।।

तदा दद्याद् गवादीनि दानानि दश चादरात् ।
समाधिस्थापितं लिङ्गं सवृषं पूजयेदपि ।।४।।

मृद्धघट्टनादिव्यापारजाततापोपशान्तये ।
क्षीरेण तर्पयेदिष्टलिङ्गादीनि महेश्वर ।।५।।

Rudra enquires —

O Parama Śiva, the beginningless, the ocean of infinite auspicious qualities! kindly enlighten me by describing the rites to be performed after the observance of the procedure of *'bhūnikṣepa'* (1).

Paraśiva replies —

Son, with the view to achieving the divine state of his father, should fulfil the rituals of shaving, bathing, besmearing the sacred ashes, wearing the garland of *Rudrākṣa* and take the permission of *gaṇas* to install the *liṅga* on the *samādhi,* duly scribed on it the name of the father and decorated with five or nine bulls (2-3). Then he should respectfully donate ten items, such as cow etc. and worship the *liṅga* along with the bull kept on the *samādhi* (4). To quench the heat produced because of putting the earth on it during the rite of *samādhi,* he should satiate the *Iṣṭaliṅga* by bathing it with the milk (5). He should

पित्रे दद्यादनुदिनं त्रिसंख्यानुदकाञ्जलीन् ।
वासोदकादिकं नैव देयं पितृहितैषिणा ॥६॥

नग्नप्रच्छादनाराधनम्

प्रविश्य ज्ञातिभिः सार्धं दीपेन सहितं गृहम् ।
नग्नप्रच्छादनाभिख्यं कुर्यादाराधनं सुतः ॥७॥

समाधिस्थापितलिङ्गस्य दशाहपर्यन्तं रक्षणम्

समाधिस्थापितं लिङ्गं दशाहान्न विचालयेत् ।
जन्त्वादिभिर्विचलिते यथास्थानं निधाय तत् ॥८॥

प्राणायामत्रयं कृत्वा तत् स्पृष्ट्वा व्याहृतीर्जपेत् ।
तस्मिन् स्वरूपतो नष्टे विधिवत् स्थापयेत् पुनः ॥९॥

दिव्यदेहावाप्तिक्रमः

प्रथमाहिककृत्येन तस्य मूर्धाऽभिजायते ।
नासिकाश्रवसी नेत्रे द्वितीयाहिककृत्यतः ॥१०॥

ग्रीवा वक्षो भुजौ चापि तृतीयेऽह्नि भवन्त्यपि ।
नाभिस्थानं लिङ्गगुदे चतुर्थेऽह्नि भवन्त्यमी ॥११॥

---

offer the handful of water three times for the welfare of his father and should never offer water squeezing the clothes (6).

Son should enter the house accompanying the kins keeping the lamp with him and then perform the worship named *'Nagna-pracchādana'* (7).

The *liṅga* kept on the *samādhi* should not be removed for ten days. If it is per chance removed from the place by any animal etc. then after putting it on the proper place, *prāṇāyām* for three times and *'vyāhṛtījapa' '(auṁ bhūh, auṁ bhuvah, auṁ svah)'* touching the *liṅga* should be observed. If the *liṅga* is destroyed, it should be installed again as per rules laid down (8-9).

After the performance of rites on the first day, the head of the deceased person is formed. Thus nose, ears and eyes are assembled after the performance of rites of second day (10). Neck, chest and hands are

ऊरू तु पञ्चमे स्यातां चर्म षष्ठे भवेदपि ।
सप्तमेऽह्नि सिराः सर्वा जायन्ते तद्विधानतः ।।१२।।

अष्टमेऽह्नि च जायेरन् सर्वरोमाण्यनन्तरम् ।
नवमाहिककृत्येन वीर्यं तस्याभिजायते ।।१३।।

दशमाहिककृत्येन तृप्तिस्तस्य परा भवेत् ।
आराधनं ततः कार्यं दिव्यरूपवतः पितुः ।।१४।।

एकोद्दिष्टविधानेन रुद्रत्वं तस्य जायते ।
तत्त्वसंयोजनवशाद् महेशत्वं पुनर्भवेत् ।।१५।।

नवाराधनक्रमः

प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा ।
नवमैकादशाह्नोश्च नवाराधनमाचरेत् ।।१६।।

अन्तर्दशाहे दर्शो वा संक्रान्तिर्वा भवेद्यदि ।
तदा समापयेदन्यः सुतस्तु न समापयेत् ।।१७।।

---

shaped on the third day and on the fourth day genital organ, anus are brought about along with the navel (11). Thais are produced on the fifth and skins on the sixth day. Thus, all the nerves are fashioned on the seventh day (12). Further, on the eighth day, the hairs of the body come into being and after the ninth days' ritual, semen are produced in the body (of the deceased) (13). He (deceased) gets full satisfaction after the completion of the rituals of the tenth day. Thus, the father with divine form is to be adored after fulfilling the last rites consecutively for ten days (14). Then he (father) attains the status of Rudra after the observance of *'ekoddiṣṭa'* for him and obtains the state of *'Maheśa'* on the completion of the procedure of *'Tattva-saṅyojana'* (15).

On the first, third, fifth, seventh, ninth and eleventh day, the son should fulfil the worship of *'navārādhana'* (16). If the new moon day or the *saṅkrānti* day falls within these ten days, then others may complete the rite *(ārādhana)* on that day, not the son (i.e. other person except son are allowed to conclude the last rites on the new moon day or the *'Saṅkrānti'* day if that falls within ten days but the son should observe rite of *'ārādhana'* for the full ten days) (17).

अदीक्षितपितृपुत्रयोर्दीक्षाक्रमः

पित्रोर्मरणकाले तु दीक्षाहीनः सुतो यदि ।
अन्त्यक्रियाऽस्य निर्वर्त्या पुत्रे निक्षिप्य कर्तृताम् ।।१८।।

अदीक्षितो यदि पिता तत्तनोर्नहि संस्कृतिः ।
तमावाह्याथ कूर्चायां दीक्षां दत्त्वा यथोदितम् ।
समाधिं सुविधायाथ नित्यकर्मादिकं चरेत् ।।१९।।

पितुः पिता तत्पिता वा दीक्षाहीनो मृतो यदि ।
पितुस्तदैक्यसिद्ध्यर्थं दीक्षां परोक्षमाचरेत् ।।२०।।

स्थण्डिले कूर्चमानीय मृतमावाह्य नामतः ।
परोक्षदीक्षाकरणे स लिङ्गी भवति ध्रुवम् ।।२१।।

दशमदिने वपनक्षीरतर्पणादिकम्

ज्ञातयः सप्तमादर्वाक् कनिष्ठा दशमेऽहनि ।
वापयेयुश्च ते सर्वे कर्तृभिः सह सर्वदा ।।२२।।

स्नात्वा धृतत्रिपुण्ड्राश्च ते कुर्युः क्षीरतर्पणम् ।
ततः कुर्याद् यथाशक्ति दशदानानि यत्नतः ।।२३।।

If the son is not initiated *(dīkṣā)* at the time of the death of his father, then he (son) should entrust the authority of the last rites to some one else (18). If the father is not initiated, then the aforesaid rites are not to be performed. In that case, a body of the *Kuśā* is to be made and the rite of *dīkṣā* should be performed. Thereafter all other rituals of *samādhi* and regular duties should duly be observed (19). If the father of the father (grand father) and his father (great grand father) expire without having been initiated, then the rite of indirect initiation should be performed in order to unite him with the ancestors (20). Keeping the *'kūrca'* (body made of *kuśā*) on the alter, the deceased is to be invocated by name and thus after performing the indirect initiation, he is sure to become a *'liṅgī'* (the bearer of *liṅga*) (21).

Relatives, kins and the youngers (than the deceased) should get shaved before the seventh and on the tenth day respectively along with the person authorised to perform the last rite (22). The rite of *'Tarpaṇ'*

सवृषभलिङ्गविसर्जनम्

समाधिलिङ्गं सवृषमुद्वास्य वसने तथा ।
निधाय तीर्थमानीय विसृजेत् तत्र संयतः।।२४।।

होमपुण्याहवाचनादिकम्

लिङ्गमुद्वास्य च स्नात्वा तिलामलकवारिभिः ।
गाणपत्याभिधं चैव होममानन्दसंज्ञितम् ।।२५।।

कुर्यात् पितृगणैः साकमानन्दसमवाप्तये ।
पुण्याहवाचनं कृत्वा ततो गच्छेद् गृहं प्रति ।।२६।।

इति श्रीमकुटागमे चर्यापादे लिङ्गस्थापनादिविधिकथनं नाम पञ्चमः पटलः।।५।।

---

with the milk should be performed after taking bath and drawing *'Tripundra'*. Then ten kinds of alms should be offered properly as per one's capability (23).

The *liṅga* installed on the *samādhi* is to be wrapped in a cloth along with the bull and to be taken to the *pilgrimage* and immersed in the water with restrained mind (24).

After immersing the *liṅga* in the water, he should take bath with the water mixed with sesamum and *Phyllanthus Emblica* etc. and then perform sacrifice named *Gāṇapatya* and *Ānanda* etc. (25). All the aforesaid sacraments are to be fulfilled in order to get the pleasure along with the ancestors. Then he should proceed for home after reciting the auspicious words (26).

Here ends the fifth chapter of the Caryāpāda of Makuṭāgama elucidating the procedures for the installation of the liṅga.

Notes and References

1. The donation of cow, land, sesamum, gold, *ghee*, clothes, cereals, jaggery, silver and salt is considered to be the ten-alms.

2. The rite of *'Nagna-pracchādana'* should be observed after entering into the room. In this rite one full pot filled up with cereals, one pot of *ghee* and one pot filled up with the pieces of gold, silver and other coins as per the capability, should be donated. The pot containing the cereals is to be covered and tied up with the cloth. These two pots are to be donated to a poor brahmin belonging to a higher family heritage in the name of Viṣṇu. *(Dharma śāstra*, p. 1131)

3. See *Dharma śāstras* for the verses 10-14.

4. See the verse no. 8 for the characteristics of *'Ekoddiṣṭa'*.

5. See *'Liṅgadhāraṇa Candrikā'* for the procedure of *'Tattva-Saṅyojana'* (pp. 271-277).

6. For detailed description of the *'navārādhana'* please see *Dharamaśāstra* pp. 1953 and 1279. It is to be noted here that the word *'ārādhana'* has been used in the Āgama of *'Vīraśaivism'* signifying the last rite.

***

Chapter-6

षष्ठः पटलः

रुद्र उवाच

अप्रमेयगुणाधार चिदानन्दैकसागर ।
एकादशेऽह्नि कर्तव्यं वदस्व करुणानिधे ।।१।।

परशिव उवाच

एकादशाहकृत्यानि

एकादशेऽहनि स्नात्वा माहेशान् वै निमन्त्र्य च
रुद्रहोमं विधायादौ वृषोत्सर्जनमाचरेत् ।।२।।

उत्सजेद् वृषभं श्वेतं रोहितं नीलमेव वा ।
तृप्त्या वै नन्दिकेशस्य मम सान्निध्यलब्धये ।
निराभार्याश्रमयुते सिद्धे न वृषमुत्सृजेत् ।।३।।

षोडशाराधनानि

आद्यमासिकमुख्यानि षोडशाराधनानि च ।
रुद्रगणाराधनं च वृषोत्सर्गाभिधं तथा ।।४।।

Rudra enquires —

O Paraśiva, the substratum of indeterminate qualities, the only ocean of consciousness and bliss, the abode of compassion! Kindly enlighten me regarding the rites to be performed on the eleventh day (of the death) (1).

Paraśiva replies —

On the eleventh day, son should take bath, invite Māheśvaras *(Jaṅgam)* and fulfil the rite of *'vṛṣotsarga'* after observing the procedure of Rudra-sacrifice (2). A bull of white, red or black colour is to be donated, so that the proximity with Me may be attained by appeasing Nandikeśa. The rite of *'vṛṣotsarga'*[1] is not to be performed for the devotee residing in the *'Nirābhārī Āśrama'* (3). Sixteen kinds of worships, commencing from half monthly, are prescribed for the ancestors. Along with them, worship of Rudra and *'vṛṣotsarga'* (offer of bull) are also included (4).

पञ्चाशद् रुद्राराधनम्

आचारादिकषड्लिङ्गस्थलषट्कसमाश्रयम् ।
अनुत्तरं च पञ्चाशद् रुद्राराधनमाचरेत् ।।५।।

एकादशे भवेदाद्यमूने मास्यूनमासिकम् ।
त्रैपक्षिकं त्रिपक्षे स्यादूनषाण्मासिकं तथा ।
प्रतिमासं मृताहस्सु ऊनाब्दं चेति षोडश ।।६।।

एकादशेऽह्नि वै कुर्यात् षोडशाराधनान्यपि ।
द्वादशाहे तदा कुर्यात् तत्त्वसंयोजनं सुतः ।।७।।

एकोद्दिष्टलक्षणम्

एकोद्दिष्टविधानेन तत्त्वसंयोगसिद्धये ।
क्रियते यदेकमुद्दिश्य त्वेकोद्दिष्टं प्रकीर्तितम् ।।८।।

शैवाराधने वर्ज्यानि

विश्वेदेवा न पूज्यन्ते नाभिश्रवणमुच्यते ।
प्रदक्षिणं विसर्गश्च सीमान्तगमनं नहि ।।९।।

Along with the worship of six *liṅgas* and six *sthalas*, such as *ācāra* etc.[2], prime adoration of fifty Rudras are also performed (5). First worship is performed on the eleventh day, *ūnmāsik* is to be done before the completion of one month, *'traipākṣik'* after three fortnight and *'ūnṣāṇmāsik'* on the completion of six months, each month on the day of death and lastly on the completion of one year. Thus sixteen ritual-worships are to be performed during the whole year (6). On the eleventh day, all the sixteen rites are to be observed and on the twelfth day, the rite of *'Tattva-saṅyojana'* should be fulfilled by the son (7). The rite of *'Tattva-saṅyojana'* when accomplished for only one person, is named as *'ekoddiṣṭa'* as per the rule laid down in the procedure of *'ekoddiṣṭa'* (8).

The worship of Viśvadeva, in the above rite, is not performed, nor the *'abhiśravaṇa'*[3] is observed. *Pradakṣiṇā*, *visarga* or *Simāntagamana* are also not done (9). On the eleventh day, eleven *Māheśvaras* should

माहेश्वरभोजनम्

एकादशेऽह्नि माहेशानेकादश सुभोजयेत् ।
यथासम्भवमेतद्धि रुद्राराधनमीरितम् ।।१०।।

तथैव भोजयेदेकं वृषोत्सर्गफलाप्तये ।
वृषोत्सर्गाराधनं तु विधातव्यं मम प्रियम् ।।११।।

रुद्राराधनक्रमः

आचारादिकषड्लिङ्गस्थलषट्कसमाश्रयम् ।
खड्गेशादिकपञ्चाशद् रुद्राराधनमाचरेत् ।।१२।।

चत्वारः षड् दश तथा रुद्रा द्वादश षोडश ।
द्वावित्याचारलिङ्गादिस्थलषट्कसमाश्रयाः ।।१३।।

पञ्चाशद्रुद्रनामानि

खड्गेशश्च बकेशश्च श्वेतो भृङ्गीश्वरस्तथा ।।
छगलण्डद्विरण्डेशौ महाकालीश्वरोऽपि च ।।१४।।

भुजङ्गेशपिनाकीशदारुकेशास्ततः परम् ।
अर्धनारीडुमाकान्त आषाडीशस्ततः स्मृतः ।।१५।।

---

be invited and fed with delicious food. The rite performed as per the capability is named as *'Rudrārādhana'* (10). One more *Māheśvara* should be fed along with them to secure the benefit of the rite of *'vṛṣotsarga'*. One must perform this *'vṛṣotsarga'* as it is very dear to Me (11).

Fifty Rudras, namely *Khadgeśa* etc. which are related to *Ṣaṭliṅga* viz. *ācāra* etc. and *ṣaṭasthalas* are worshipped (12). Fifty Rudras are related to *liṅgas* i.e. four to *ācāraliṅga*, six to *guruliṅga*, ten to *śivaliṅga* , twelve to *jaṅgamaliṅga*, sixteen to *prāṇaliṅga* and two to *Mahāliṅga*. All are related to *ṣaṭasthalas* (13).

Khaḍgeśa[4], *Bakeśa, Śveta, Bhṛṅgīśvara, Chhagalaṇḍeśa, Dviraṇḍeśa, Mahākālīśvara, Bhujaṅgeśa, Pinākīśa, Dārukeśa, Ardhanārīśa, Umākānta, Āṣāḍīśa, Daṇḍīśa, Atrīśa, Mitreśa, Meṣeśa,*

दण्डीशात्रीशमित्रेशमेषेशा लोहितेश्वरः ।
शिखीश्वरश्च क्रोधेशश्चण्डः पञ्चान्तकेश्वरः ।।१६।।

शिवोत्तमैकरुदेशौ कूर्मेशश्चैकनेत्रकः ।
चतुराननेश्वराजेशशर्वसोमेश्वरास्तथा ।।१७।।

लाङ्गलीशश्च संवर्तकेशः श्रीकण्ठसंज्ञकः ।
अनन्तेशश्च सूक्ष्मेशस्त्रिमूर्तीशस्ततः स्मृतः ।।१८।।

अमरेशस्तथाऽर्घेशो भारभूतेश्वरस्तथा ।
अतिथीशश्च स्थाण्वीशो हरो झिण्टीश्वरस्तथा ।।१९।।

भौतिकेशश्च सद्योजातेशश्चानुग्रहेश्वरः ।
अक्रूरेशो महासेनो लकुलीशः शिवेश्वरः ।
पञ्चाशत्संख्यका रुद्रा अमी पूज्या यथाक्रमम् ।।२०।।

इति श्रीमकुटागमे चर्यापादे एकादशाहकर्तव्यविधि-
कथनं नाम षष्ठः पटलः ।।६।।

Lohiteśvara, Śikhīśvara, Krodheśa, Caṇḍa, Pañcāntakeśvara, Śivottama, Ekarudreśa, Kūrmeśa, Ekanetra, Caturānaneśa, Ajeśa. Śarva, Someśvara, Lāṅgalīśa, Saṅvartakeśa, Śrikaṇṭha, Ananteśa, Sūkṣmeśa, Trimūrtīśa, Amareśa, Argheśa, Bhārabhūteśvara, Atithīśa, Sthāṇvīśa, Hara, Jhiṇṭīśa, Bhautikeśa, Sadyojāteśa, Anugraheśvara, Akrūreśa, Mahāsena, Lakulīśa and Śiveśvara are the fifty Rudras to be worshipped respectively (14-20).

Here ends the sixth chapter of the Caryāpāda of Makuṭāgama advocating the procedures of the rituals performed during eleven days.

Notes and References

1. Donating the bull in the name of ancestors has got immense value. See '*Dharmśāstra kā itihāsa*, Vol.3, pp. 1291-92.
2. See the verse 12-13.

3. The recitation of the vedic hymns by the brahmins at the time of taking the food on the occasion of *śrāddha* is named as *'Abhiśravaka'*.

4. See *Prapañcasāra* (3/39-44) for the names of the fifty Rudras starting from Śrikaṇṭha to Saṅvartaka. There are similarities despite of some differences. In the contemplation of the sixfold *liṅgas* and the six sthalas in the six centres (*ṣaṭcakra*), the *Rudras* are being imagined as the representative of the meditative colours.

* * *

Chapter-7

सप्तमः पटलः

रुद्र उवाच

सर्वशक्तिसमायुक्त सर्वैश्वर्यसमुन्नत ।
द्वादशाहकृत्यविधिमशेषं ब्रूहि मे विभो ॥१॥

परशिव उवाच

द्वादशाहकृत्यानि

चतुर्थस्य निवृत्त्यर्थं जीवभावनिवृत्तितः ।
तत्त्वादियोजनादूर्ध्वं चतुर्थोऽपि निवर्तते ॥२॥

गुरुदीक्षापरिप्राप्तशिवलिङ्गाङ्गयोगतः ।
द्विरेफकीटन्यायेन शिवैक्यं प्राप्तवान् द्विजः ॥३॥

लिङ्गाङ्गसंगिनि मृते सम्प्राप्ते द्वादशेऽहनि ।
सापिण्ड्यं नैव कर्तव्यं प्रेतत्वाभावतस्ततः ॥४॥

Rudra enquires —

O the all powerful, the illustrious embodiment of all the divine qualities, the all embracing immanent! Kindly explain to me the full procedures of *'dvādaśā'* rituals (the twelfth days rites) (1).

Paraśiva replies —

The creaturehood is eliminated along with the fourth state[1] by the performance of *'Tattva-saṅyojana'*. The rite of *'Tattva-saṅyojana'* is performed for the elimination of the fourth state. By the observance of the rite, the creaturehood also comes to an end along with the fourth state (meaning thereby after the performance of *Tattva-saṅyojana'* on the twelfth day by the son, the deceased leaving his secluded fourth stage conjoins with his ancestors) (2). The devotee who remains attached with the *Śiva-liṅga* (*Iṣṭaliṅga)* obtained from *Guru* at the time of *dīkṣā* attains oneness with Śiva by the incessant contemplation as the insect is transformed into a bee (3) The rite of twelfth day is not done for the deceased who althrough bears *liṅga* on the body. The rite of *'sāpiṇḍya'* is not to be done for him as he is not affected by the spirithood (the *'sāpiṇḍya'* rite is performed for the elimination of

दीक्षाकालपरिप्राप्तशिवैक्यं जीवभावतः ।
आविर्भूतं विजानन्ति मदीयागमवेदिनः ।।५।।

सदाशिवाद्यभिन्नेभ्यः पितृभ्यस्तत्त्वसम्मिताः ।
कलाः संगृह्य चान्यत्र समभ्यर्च्य यथाविधि ।।६।।

तत्त्वादियोजनक्रमः

जीवभावनिवृत्त्यर्थं मृतलिङ्गाङ्गसङ्गिनः ।
वर्गत्रयैक्यसिद्ध्यर्थं तत्त्वादीन् योजयेत् सुतः ।।७।।

द्वादशेऽहनि वै कर्ता माहेशान् सन्निमन्त्र्य च ।
गृहीत्वैव गणानुज्ञामेवं संकल्पमाचरेत् ।।८।।

पितुस्तदीयपित्राद्यैर्महेशादिस्वरूपकैः ।
शिवसायुज्यसिद्ध्यर्थं करिष्यन् तत्त्वयोजनम् ।।९।।

नन्दिकेशमहाकालसंज्ञिनोर्विश्वदेवयोः ।
पितुः पितामहादीनां महेशादिस्वरूपिणाम् ।।१०।।

---

spirithood, so the observance of this rite is not required for the *liṅgī* – the bearer of *liṅga)* (4). The knower of Āgama is fully aware of the fact that Śivahood is manifested in place of creaturehood at the time of initiation owing to the attainment of oneness with Śiva (5). By borrowing the *'kalās,* the constituents (through the rite of *Tattva-saṅyojana*) from the fore fathers who have attained the state of non-duality with Sadāśiva etc., worship should duly be performed by imposing those *'kalās'* to the deceased (6).

The son should perform the procedure of *'Tattva-saṅyojana'* for the wearer of the *liṅga* for the cessation of his creaturehood and unite him with the three generations of ancestors (7). On the twelfth day, the authorised person should invite Māheśvaras and take vow after seeking permission from *gaṇa* (ardent devotee) (8). 'I am uniting my father with his forefathers who have attained the nature of *Māheśvaras,* by adopting the procedure of *'Tattva-saṅyojana'* with the view to attaining the state of *'Śiva-sāyujya'* (enjoyment of the nature of Śiva by being immersed in Śiva) (9). I shall worship with determination the thirty six

तत्त्वसंयोजने प्राप्ते मृतपत्नी रजस्वला ।
तत्त्वसंयोजनं न स्यात् तत्कुर्यात् पञ्चमेऽहनि ।।५।।

क्लीबादीनां तत्त्वसंयोजनं नास्ति

तत्त्वसंयोजनं नैव क्लीबानां दुष्टयोषिताम् ।
अद्वादशवयस्कानां मृतानां ब्रह्मचारिणाम् ।।६।।

नैष्ठिकानां यतीनां च कार्येशानबलिस्तथा ।
तत्त्वसंयोरहिते न प्रत्याब्दिकमिष्यते ।।७।।

पार्वणाराधनादिकम्

अदैवं पार्वणसमं सोदकुम्भमधर्मकम् ।
संकल्पविधिना कार्यमन्वहं त्वाब्दिकावधि ।।८।।

तत्त्वसंयोजनादूर्ध्वं वत्सरं वा तदर्धकम् ।
नान्यत् कुर्यादष्टकायाः पार्वणाराधनं सुतः ।।९।।

---

other rites except the rite of *'Tattva-saṅyojana'* (4). If the wife of the deceased gets menstruated during the performance of the rite of *'Tattva-saṅyojana'*, then she should fulfil the rite of *'Tattva-saṅyojana'* after being pure on the fifth day (5).

Rite of *'Tattva-saṅyojana'* is not performed for the eunuchs, corrupt women, boys under twelve years and celibate (6). The sacrifice named *Īśāna* has been prescribed for *'naiṣṭik brahmacārī'* and sage *(yati)*. If the rite of *'Tattva-saṅyojana'* has not been performed, then the yearly rites are also not to be observed (7).

The whole procedure of last rite is to be fulfilled with the *'Pārvaṇaśrāddha'*. The rite of *'udaka kumbh'* etc. should be performed with vow within the period of one year (8). Son should not perform for the whole year or six months the rite of *'Pārvaṇārādhana'* except the rite of *'aṣṭakā'* provided the *'Tattva-saṅyojana'* is performed at the time of last rite (i.e. if *'Tattva-saṅyojana'* is performed during the last rite, then *'Pārvaṇārādhana'*[3] need not be done, only *'aṣṭakā'*[2] is enough) (9). Son should perform the rite of *'Pārvaṇaśrāddha'* every month and year for his father who has attained the nature of *Maheśa*

चतुर्थभावनिवृत्त्यर्थं पात्रप्रदानक्रमः

पितृस्थानस्थितायास्मै दत्त्वा तत्पात्रमादितः ।
पितरं पितामहस्य स्थाने संयोजयाम्यहम् ।
इति ब्रुवाणस्तत्पात्रं दद्यात् पैतामहाय वै ।।१७।।

पितामहं महेशस्वरूपं हि प्रपितामहे ।
संयोजयामीति वदन् तत्पात्रं पूर्ववत् ततः ।
प्रपितामहपदस्थाय दद्यान्माहेश्वराय च ।।१८।।

ततः परं सदाशिवस्वरूपं प्रपितामहम् ।
संयोजयाम्यहं वृद्धप्रपितामह इति ब्रुवन् ।
तत्तस्थानसंस्थितायास्मै दद्यात् पात्रमनन्तरम् ।।१९।।

शिवस्वरूपमलं तं वृद्धप्रपितामहम् ।
अरूपे परमे शैवे तत्त्वे संयोजयाम्यहम् ।।२०।।

इति ब्रुवाणस्तमिमं मयि लीनं विभावयेत् ।
एवमुक्तविधानेन चतुर्थो विनिवर्तते ।।२१।।

इति श्रीमकुटागमे चर्यापादे द्वादशाहविधिकथनं
नाम सप्तमः पटलः ।।७।।

The copper-container should be handed over to *Māheśvara* seated in a place for father. Then the container should again be handed over to another *Māheśvara* assuming him as grandfather and uttering 'I am uniting my father with grandfather' (17). 'I am attaching the grand father who is of the nature of *Māheśvara* to great grand father' — uttering this he should dedicate that copper container to the *Māheśvara* assuming him as great grandfather (18). Thereafter uttering, 'I am uniting the great grandfather who is of the nature of Sadāśiva, to great great grandfather'; he should surrender that copper container to the *Māheśvara* seated at that place (19). 'I am uniting the great great grand father who is as pure as Śiva to formless Paramaśiva' — uttering it he should contemplate his immersion into that formless *Śiva-tattva*. Thus

the fourth state of the departed soul comes to an end by the observance of the procedure of *Tattva-saṅyojana'* (20-21).

Here ends the seventh chapter of Caryāpāda of Makuṭāgama illustrating the procedure of the rite to be performed on twelfth day.

Notes and References

1. The rite of *'sapiṇḍa karaṇa'* is prohibited in Vīraśaivism. The procedures of *Tattva-saṅyojana* of the *Kalās* of the deceased with the elements of father, grand father and great grand father have been replaced.
2. See *Liṅgadhāraṇa Candrikā* for the description of 5 *Kalās* and the procedures of the *saṅyojana* of 38 *Kalās*, pp. 271-277; *Vīraśaiva dīkṣā vidhi*, pp. 83-84.
3. "सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥" *(Mahānārāyaṇopaniṣad*, Chapter 15).
4. ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् । ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोऽम् ॥" *(Mahānārāyaṇopaniṣad*, Chapter 19).

* * *

शाम्भवव्रतिनां सापिण्ड्यं नास्ति

शाम्भवव्रतिने श्राद्धं सपिण्डं विदधाति यः ।
कुलमासप्तमं तस्य नरके निपतेद् ध्रुवम् ।।२१।।

त्रिविधमाराधनम्

गृह्याद्यधिकृतं चैव निराभार्याधिकारिकम् ।
सांकल्पिकमिति तथा प्रोक्तमाराधनं त्रिधा ।।२२।।

गृह्याद्यधिकृते कार्यं विश्वेदेवादिसंयुतम् ।
विश्वेदेवान् पित्रुद्देशं त्यागं संरक्षकं तथा ।
वर्जयित्वैव कर्तव्यं निराभार्याधिकारिकम् ।।२३।।

विश्वेदेवान् रक्षकं च त्यागमावाहनादिकम् ।
त्यक्त्वा संकल्पमात्रेण कारुण्यानां विधीयते ।।२४।।

आराधने माहेश्वरार्चा

शैवशास्त्रविशेषज्ञः षट्स्थलज्ञानकोविदः ।
त्रिकालपूजाभिरतो लिङ्गनिष्ठापरायणः ।।२५।।

The person who performs *'sapiṇḍa śrāddha'* for the observer of *śāmbhavavrata,* is sure to fall in the hell along with the seven generations of ancestors (21).

This worship is said to be of three kinds, namely with regard to householder, *nirābhārī* and *saṅkalpika* (22). *Viśvadeva, pitṛddeśa, tyāga* and *saṁrakṣaka* are included in case of householders. For the *nirābhārī*, the rites of *Viśvadeva, pitṛddeśa, tyāga, saṁrakṣaka sūtra* are prohibited (23). Only conceptual worship is performed in case of *'kāruṇik'*[4] and the rites of *Viśvadeva, rakṣāsūtra, tyāga,* and *āvāhana* are redundant (24).

The worship of the person who is well-versed in the knowledge of Śaiva scriptures, adept in the wisdom of *ṣaṭasthala,* worships Śiva three times during the whole day, faithfully devoted to *Liṅga* and *Māheśvaras,* is considered to be the main worship. The person who worships only once a day is said to be of medium category (25-26). The

षट्त्रिंशतां च तत्त्वानां कलानामष्टत्रिंशताम् ।
आराधनं करिष्यामीत्येवं संकल्पपूर्वकम् ।।११।।

विश्वेदेवौ च पित्रादीन् तत्त्वानि च कलास्तथा ।
आवाह्य चाभिसम्पूज्य चिकीर्षुस्तत्त्वयोजनम् ।
दश दानानि वै कुर्याद् गवादीनि यथाक्रमम् ।।१२।।

अथ कर्ता गृहीत्वा तु ताम्रपात्रं हि साक्षतम् ।
पितामहादिस्थानस्थमाहेशनिकटस्थितः ।।१३।।

पितामहादिभिः पात्रे हस्तस्पर्शं हि कारयन् ।
पितामहादीनावाह्य पितृस्थानीयमाश्रितः ।।१४।।

सद्योजातं प्रपद्यामीत्याद्यान् मन्त्रान् समुच्चरन् ।
चन्द्रशेखरमुख्यान् वै तत्त्वेशांस्तत्र योजयेत् ।।१५।।

कलायोजनम्

ईशानः सर्वविद्यानामित्याद्यानुच्चरन् मनून् ।
शशिन्यादिकलाश्चापि क्रमशस्तत्र योजयेत् ।।१६।।

---

elements[2] of father, thirty eight *kalās,* the Viśvadevas namely Nandikeśa and Mahākāla etc., the grandfathers of the nature of Maheśa' (10-11). Invoking and worshipping Viśvadeva, ancestors, elements and *kalās,* he should perform the rite of *'Tattva-saṁyojana',* fulfil the procedure of ten alms and donate cow respectively (12). The performer of rite should take the seat near the place meant for father and ancestors who are of the nature of Maheśa along with the copper plate filled with rice (13). The performer of the rite should take the shelter of the place of father, invoke ancestors and assume their touch on that container (14). He should unite his father with the controller of *tattvas* namely Candraśekhar etc. reciting the hymn *'Sadyojātam prapadyāmi'*[3] etc. (15).

Kalās namely *Śaśinī* etc. should also be attached gradually uttering the hymn *'Īśānaḥ sarvavidyānām'*[4] (16).

तत्त्वसंयोजनवशान्महेशत्वयुजः पितुः ।
प्रत्यब्दं प्रतिमासं च कुर्यात् पार्वणवत् सुतः ।।१०।।

पाकशेषं न यो भुञ्ज्याद् दैवे पित्र्ये च कर्मणि ।
सम्यगाचरितं वाऽपि तस्य तत् स्यान्निरर्थकम् ।।११।।

नक्तव्रते च नियते संकटे राहुदर्शने ।
रात्रावपि विधेयं स्याच्छ्राद्धं श्रद्धासमन्वितैः ।।१२।।

उपरागे पैतृके च तीर्थे दर्शे च संक्रमे ।
पितृन् संतर्पयेद् धीमान् साक्षतैर्विमलैर्जलैः ।।१३।।

आराधनलक्षणम्

पित्रादयो महेशादिरूपा यत्र हि पैतृके ।
आराध्यन्ते तु भक्त्या तदाराधनमुदीरितम् ।।१४।।

तत्र नन्दिमहाकालौ विश्वेदेवौ प्रकीर्तितौ ।
पित्रर्थं कीर्तिता एते महेशश्च सदाशिवः ।
शिव इति त्रयः शम्भुः संरक्षक इति स्मृतः ।।१५।।

---

through the rite of *Tattva-saṅyojana* (10). If the son does not accept the remaining portion of the food prepared during the worship of divinities and ancestors, then all the rites, even if perfomed properly, become futile (11). The last rite is allowed to be performed respectfully in the night, in the event of emergency, *naktavrata* and eclipse during day time (12). Wise person should satiate the ancestors by performing *'tarpaṇ'* with pure water and rice during the time of eclipse, at the pilgrims of ancestors and on the day of moonless night and on the last day of the month (13).

On the occasion of the last rite of the ancestors who have attained the nature of *Maheśa,* the devotional worship of forefathers is named as *'ārādhana'* (14).In this *'ārādhana' Nandi,* and *Mahākāla* are named as *Viśvadeva* and father, grandfather and great grand father are respectively named as *Maheśvara, Sadāśiva* and *Śiva*. *Śambhu* is said to be the protector of all (15).

द्विविधं श्राद्धमङ्गानि च

श्राद्धं तु द्विविधं प्रोक्तं पितृमल्लोकवासिनाम् ।
पितृणां तृप्तिजनकं पितृलोकनिवासिनाम् ।।१६।।

श्राद्धस्याङ्गानि वक्ष्यामि शृणु रुद्र यथाक्रमम् ।
होमस्त्यागस्तथा पिण्डो विश्वेदेवास्तिलाः कुशाः ।
उद्देशः पितृदेवानामर्घ्यपात्रं च रक्षकम् ।।१७।।

अपसव्यं च विकिरं श्राद्धाङ्गमिति कीर्तितम् ।
मल्लोकवासिनां पुत्र पितृणां प्रवदाम्यथ ।।१८।।

श्राद्धकर्मणि निषिद्धम्

होमः पिण्डस्तिला दर्भा विकिरं चार्घ्यपात्रकम्
अपसव्यं तथा सप्त निषिद्धं श्राद्धकर्मणि ।।१९।।

विश्वेदेवाः पित्रुद्देशस्त्यागः संरक्षकोऽपि च ।
श्राद्धाङ्गानि भवन्त्येव तस्मात् तान्युपयोजयेत् ।।२०।।

Śrāddha (last rite) is said to be of two kinds i.e. one is for the residents of the sphere of ancestors and the second one for the indwellers of the region of Śiva. O Rudra! now I shall gradually illustrate the various procedures of the *śrāddha* that provide pleasures to the inhabitants of the sphere of ancestors. Please listen. Oblation to fire *(hom), tyāga, piṇḍa, Viśvadeva, sesamum, kuśā,* the sect of ancestors, the container for oblation *(arghapātra), rakṣā sūtra* (the protective thread), *apasavya* and *vikir* are known as the various accessories and ingredients of the ceremony of the last rites for the ancestors. Now I am describing the ancestors who dwell in my sphere *(Śivaloka)* (16-18).

Sacrifice *(hom), piṇḍa* (offering in last rite), sesamum, *darbha, vikir,* container for oblation *(arghapātra)* and *apasavya*, these seven items are prohibited for the ancestors residing in *Śivaloka* (19). Viśvadeva, place of ancestors, *tyāga* and protective thread *(rakṣā sūtra)*, these four are the accessories and ingredients of rite for them also. So, these items should be utilised (20).

Chapter-8

अष्टमः पटलः

रुद्र उवाच

समस्तजगदाधार समस्तामरवन्दित ।
प्रकीर्णकविधिं ब्रूहि सर्वज्ञ परमेश्वर ।।१।।

परशिव उवाच

सोदरेषु पितुः कर्म कुर्वत्स्वन्यः स्थलान्तरात् ।
दशाहमध्य आगच्छेत् कृत्वा गतदिनक्रियाम् ।
समाधिवर्जं मिलितः शेषं कर्म समाचरेत् ।।२।।

तत्त्वसंयोजनाधिकारक्रमः

कनिष्ठेनाऽथवाऽन्येन कृतेऽपि पितृकर्मणि ।
कुर्यादुदकदानं च तत्त्वसंयोजनं सुतः ।
अग्रजेन कृतं कर्म नानुजेन पृथक् कृतिः ।।३।।

तत्त्वयोजने विशेषः

श्राद्धकर्तुर्यदा भार्या ह्याशौचान्ते रजस्वला ।
श्राद्धशेषं प्रकुर्वीत विसृजेत् तत्त्वयोजनम् ।।४।।

Rudra enquires —

O omniscient supreme God, the substratum of the universe, adored by all divinities! Please tell me the procedure of *'Prakīrṇaka'* (1).

Paraśiva replies —

If the son arrives from outside within ten days of his father's last rite being performed by his brothers[1], he should first perform all other rites except *samādhi* and join his brothers for the rest (2).

Eldest son should perform the *'udakadāna'* and *'Tattva-saṁyojana'* rites himself for his father even if already performed by his youngest or other brothers. Once fulfilled by the eldest, younger need not perform it again (3).

If the wife of the performer is menstruated after the completion of the period of impurity (for the death) is over, she should perform the

निमन्त्रितमाहेश्वराणां सत्कारादिकम्

स्वागतं परिपृच्छ्यैव दत्त्वा चासनमप्यथ ।
शन्नो देवीरिति पठन् पादौ प्रक्षालयेदपि ।।१६।।

पादाम्बु स्वशिरस्युक्ष्य पादावुद्वर्त्य वाससा ।
भस्मना साक्षतैर्गन्धैः पुष्पविल्वादिकैरपि ।।१७।।

धूपदीपनिवेद्यैश्च मन्त्रपुष्पेण चार्चयेत् ।
विश्वेदेवान् पितृन् पश्चादथ संरक्षकं क्रमात् ।
पादौ प्रक्षाल्याचमेयुः कर्ता भोक्तार एव च ।।१८।।

प्राणानायम्याथ कर्ता हस्तार्चापात्रगाक्षतान् ।
गृहीत्वा विष्टरान् दद्यात् स्वाहां स्वधां समुच्चरन् ।।१९।।

विश्वेदेवाद्यावाहनम्

विश्वेदेवान् पितृंश्चैव नामगोत्रपुरस्सरम् ।
आवाह्य गन्धपुष्पाद्यैः समभ्यर्च्य यथाक्रमम् ।
वासोभिश्च हिरण्येन यथाशक्ति सुतोषयेत् ।।२०।।

Invited *Māheśvaras* should be offered respective seats with ovation and their feet should be washed reciting the hymn *'sanno devīḥ'* (16). He should sprinkle the sacred water washing their feet on his own head and clean their feet with cloth; thereafter the feet of *Māheśvaras* should be worshipped with sacred ashes, rice, incense, flowers and *bilva* etc. along with sandlewood, lamp and offerings, reciting the hymns. Then the holy feet of Śiva, the protector, should also be washed respectively along with the *Viśvadevas* and ancestors and both the performer and enjoyer of the last rite should accept that water (17-18). The performer of the last rite should observe *prāṇāyam* and dedicate the rice kept in a vessel with hands to the *vistaro*[4] uttering *'svāhā'* and *'svadhā'* in the name of divinities and ancestors respectively (19).

He (performer) should please the *Viśvadevas* and ancestors invoking them by name and lineage, adore them with incenses, flowers etc. and donate clothes and gold as per his capacity (20).

Chapter-9

नवमः पटलः

रुद्र उवाच

स्वलीलाकल्पितानल्पजगज्जाल निराकुल ।
प्रत्याब्दिकविधानं मे कृत्स्नं ब्रूहि जगत्पते ।।१।।

परशिव उवाच

प्रत्याब्दिकाराधनविधानम्

विधाय नित्यकर्माणि विप्रानाहूय सादरम् ।
दीपं प्रज्वाल्य गन्धाद्यैरलङ्कृत्य प्रणम्य च ।।२।।

सभस्मघुण्टिकं चैव ताम्बूलं दक्षिणान्वितम् ।
गृहीत्वा नन्दिकेशादीन् नमस्कुर्याद् गणेश्वरान् ।।३।।

नम आव्याधिनीभ्य इत्यथ कुर्यात् प्रदक्षिणम् ।
त्रिसंख्यं घण्टिकानादं कारयन् स्थिरचेतसा ।।४।।

उपस्पृश्याथ संकीर्त्य देशकालौ यथाक्रमम् ।
पितुरैक्यदिनाभिख्याराधनं तृप्तिसाधनम् ।
करिष्य इति संकल्प्य कलशं चाभिपूज्य च ।।५।।

Rudra enquires —

O the Lord of the universe! you remain unperturbed amidst the self created multiplicity of the universe. Please enlighten me regarding the procedure of the *Pratyābdik* (annual last rites) (1).

Paraśiva replies —

After perfoming the regular duties, one should respectfully invite and bow down to the *brāhmin* enkindling the lamp and decorating with the incenses etc. (2). One should approach and bow unto *gaṇas* like *Nandikeśvaras* with sacred ashes, betel leaves and money as offering contained in a vessel (3). Then he should encircle the *Māheśvaras* with intense concentration reciting the hymn *'nama āvyādhinībhya'*[1] and ringing the bell three times (4). Now having performed *'ācamana'* and

इमा माहेशपूजार्थं दुरितक्षयकारकाः ।
इति द्रव्याणि सम्प्रोक्ष्य क्षणान् दद्याद् यथाक्रमम् ।।६।।

सप्तद्रव्यवर्जनम्

अपसव्यं तिलान् दर्भान् पिण्डदानाग्निकर्मणी ।
विकिरं चार्घ्यपात्रं च शैवे सप्त विवर्जयेत् ।।७।।

पित्राराधनदेवता:

पिता महेश्वरः प्रोक्तस्तत्पिता च सदाशिवः ।
प्रपितामहः शिवश्चैते पित्राराधनदेवताः ।।८।।

आराधनकर्मणि वैषम्यवर्जनम्

तपसा विद्यया वाऽग्र्या अर्हन्त्युत्तममासनम् ।
दानभोजनपूजासु न वैषम्यं शुभावहम् ।।९।।

---

duly praising the space and time, vowing 'I shall fulfil the rite of *'aikyapādan'* for the pleasure of my father', he should worship the pot (5). He should wash the ingredients of worship thinking that all the accessories that annihilate the sins are meant for the purpose of adoration of *Māheśvaras (Jaṅgamas)* and then gradually surrender them one by one (6).

Apasavya, sesamum, *darbha, piṇḍadāna, havana, vikir* and *arghapātra* are the seven items of *śrāddha* prohibited for the *śaivas* (who is initiated with the original hymn) (7).

In the last rite ceremony, father is said to be *Māheśvara,* grandfather is of the nature of *Sadāśiva* and great grandfather is the embodiment of Śiva. These three are the divinities to be worshipped in the last rite ceremony (8).

People, through the penance and wisdom attain lofty positions, but for the purpose of donation, feeding and worshipping, there should not be any discrimination (9).

माहेश्वरप्रार्थनम्

श्रद्धायां प्राण इत्याद्यैर्जुहुयुः प्राण आहुतीः ।
आमनन् मधु वातेति मध्विति त्रिः समुच्चरन् ।
यथासुखं जुषध्वमित्युक्त्वा तैः प्रतिवाचयेत् ।।३३।।

मन्त्रमध्ये क्रियामध्ये शम्भोः स्मरणपूर्वकम् ।
यत्किञ्चित् क्रियते कर्म तत्कोटिगुणितं भवेत् ।।३४।।

अपेक्षितं याचितव्यं त्याज्यं चैवानपेक्षितम् ।
उपविश्य सुखेनैव भोक्तव्यं स्वस्थमानसैः ।।३५।।

उक्त्वा प्रसादभोगस्य काले तेषां निषद्गणान् ।
जाबालाद्यधिश्रवणमन्त्रान् संश्रावयेदपि ।।३६।।

उत्तरापोशनम्

तेषां प्रसादभोगान्ते मधु वातेति मध्विति ।
तृप्ताः स्थेति च तानुक्त्वा तृप्ताः स्म इति वाचयेत् ।।३७।।

---

me; let the Sadāśiva, the Lord of the lords, the supreme Self be pleased with me, let the God *Iśa,* the form of the ancestors be pleased', uttering these words, he should pour water (31-32).

Then the invitee *Māheśvara* should offer oblation to his own *prāṇa,* reciting the hymn *'śraddhāyām prāṇaḥ'*[11] etc. Performer of the rite should recite three verses viz. *'Madhuvātā, Madhu'* etc.[12] and request the Māheśvaras to eat food at ease, without any hurry. They (Māheśvaras) also should reciprocate the same (33). If Śiva is remembered during the recitation of hymns and performance of any rite, then billion times of results is produced (34). Māheśvaras should demand for expected food of their liking and reject the undesirables. They should eat food sitting with a peaceful healthy mind (35). During the time of accepting the offerings, they should enchant the hymns of *upaniṣads* and the hymn of *Jābālā* concerning the rite of *'śrāddha'* (36).

After submitting the offerings (to the *Māheśvaras*), the hymn *'madhuvātā, madhu'* etc. should be recited. The performer of the rite should enquire regarding their satisfaction and they *(Māheśvaras)*

माहेश्वरोऽर्चनीयः स्यान्मुख्य आराधने स्मृतः ।
एककालार्चनासक्तो मध्यमः परिकीर्तितः ।।२६।।

अनर्पितं च यो भुङ्क्ते नैकदा लिङ्गमर्चति ।
मद्भक्तानपि यो द्वेष्टि वर्जनीयः स सर्वदा ।।२७।।

इति श्रीमकुटागमे चर्यापादे प्रकीर्णकविधिकथनं
नाम अष्टमः पटलः ।।८।।

---

person who accepts food without offering Me, never worships *liṅga* and jealous of my devotees, is always to be abandoned (27).

Here ends the eighth chapter of Caryāpāda
of Makuṭāgama narrating the
procedure of Prakīrṇaka.

Notes and References

1. See *Dharamaśāstra kā itihāsa* (Vol. 3, pp. 1149-1153).
2. The *śrāddha* performed on the day of *aṣṭamī* of the bright fortnight of the month of Mārgaśīrṣa is known as the *'aṣṭakā'*. This rite is performed for Indra, Viśvadeva, Prajāpati and ancestors with the ingredients of *'apūp'* and vegetables. See *Dharmaśāstra kā itihāsa* (Vol. 3, p. 1207).
3. The *śrāddha* performed in the name of father, grand father and great grand father is known as *'Pārvaṇ'*. This is the most important among all the *śrāddhas*. See *Dharmaśāstra kā itihāsa*, (Vol. 3, pp. 1240-1277).
4. In the commentary of *Brahmasūtra* by Bhaskar, a Śaiva sect namely 'Karuṇāsiddhānti' has been mentioned along with the Siddhānta śaiva, Pāśupat, Kālāmukh and Kāpālika. Here it seems that by the word *'kāruṇik'*, the *jaṅgama* of the above mentioned sect has been referred to.

❋❋❋

विकीर्य भस्म भोज्येषु तन्महेशेति चामनन् ।
आराधने गयां ध्यात्वा ध्यात्वा देवं महेश्वरम् ।
महेशादीन् पितृन् ध्यात्वा कुर्यादाराधनं ततः ।।२१।।

माहेश्वरेभ्यो भोजनपर्यवेषणम्

इति मन्त्रं समुच्चार्य पाकदोषनिवृत्तये ।
पञ्चब्रह्माभिधैर्मन्त्रैराज्यमन्त्रेऽभिघारयेत् ।।२२।।
पात्रेषु भक्ष्यभोज्यादि पर्याप्तं निक्षिपेदपि ।

प्रसादेऽङ्गुष्ठनिवेशनम्

माहेश्वरः स्वेष्टलिङ्गसमर्पणविधेरथ ।।२३।।
कर्ता देव सवित इत्युच्चरन् परिषेचनम् ।
पात्रस्य कृत्वा पृथिवी ते पात्रं यच्छंयोरिति ।।२४।।
त्र्यम्बकं च पठन्नेव माहेश्वरकरं ततः ।
गृहीत्वैव प्रसादे तु तदङ्गुष्ठं निवेशयन् ।।२५।।

स्वाहास्वधाभ्यां देवपितृतर्पणम्

भोक्तारमन्नमात्मानं ब्रह्मेत्येव विभावयन् ।
भुवं गयां शूलधरं भोक्तारं भावयन्नपि ।।२६।।

Sacred ashes should be sprinkled on the food assuming it for the *Māheśvaras*. Then *'ārādhana'* should be performed after meditating on the pilgrimage Gayā, God Maheśvara and ancestors viz. Maheśa etc. (21).

Reciting this hymn and for the eradication of the impurities of the food, *'abhidhānam'*[5] is to be done enchanting the five hymn namely *'Pañcabrahma'*[6] (22).

Then enough quantity of food should be served on the vessel. Thereafter *Māheśvara* should offer food to the *Iṣṭaliṅga*. Worshipper should purify the vessel uttering the hymn *'deva savitaḥ'*[7], then he should hold the thumb of *Māheśvara*[9] and put it into the offering reciting the hymn *'pṛthvī te pātram'*[8] *'yacchaṅyo'*, *'tryambakam'*[10] etc. (23-25).

Conceiving the enjoyer, self and food as the expression of Brahman, contemplating on earth, pilgrim Gayā and God Śiva — the

नाम गोत्रं च सम्बन्धमुच्चार्य च प्रसादकम् ।
स्वाहां स्वधां यथायोगं नमश्च न ममेति च ।
ब्रवन् समर्पयेद् देवपितृभ्यश्च यथाक्रमम् ।।२७।।

पुनरावृत्तिरहितपितृतृप्तिनिरूपणम्

गयायां श्रीरुद्रपादे क्षेत्रेषु श्रीनगादिषु ।
दत्तमस्त्वित्युद्गिरन् वै साक्षतं विसृजेज्जलम् ।।२८।।

ततःसंकल्प्य च कृतेनैक्याहाराधनेन च ।
पितृणामक्षया तृप्तिः पुनरावृत्तिवर्जिता ।।२९।।

शाश्वती शिवसायुज्यसिद्धिर्भूयादिति ब्रुवन् ।
सर्वमेतद् यथाकालं दत्तमस्त्विति वाचयेत् ।।३०।।

आपोशानप्रदानक्रमः

दत्त्वा चापोशनं देवपितृभ्यश्च यथाक्रमम् ।
ईशानः पितृरूपेण महादेवो महेश्वरः ।।३१।।

प्रीयतां भगवानीशः परमात्मा सदाशिवः ।
प्रीयतां पितृरूपीश इत्युक्त्वा जलमुत्सृजेत् ।।३२।।

---

bearer of triden – (26) uttering the name, lineage and relation, the offering is to be dedicated in the name of divinity and ancestors reciting for them *'svāhā'*, *'svadhā'* and the hymn *'namah'*, *'na mama'* etc. The water along with the rice should be poured in, (27) praying for the results equal to the offering dedicated to the feet of Śri Rudra in Gayā and Śriśailam (28). During the fulfilment of rite of uniting the deceased with the ancestors, one should pray for their unending pleasure caused by the cessation of transmigration (29). Now the prayer should be held for the accomplishment of the eternal union with Śiva and the performer should assert thus — 'whatever is required to be dedicated has duly been fulfilled' (30).

Then water should be poured for *'ācamana'* in the name of divinities and ancestors respectively. 'Let the eminent God Maheśvara, the embodiment of *Īśāna* who is the form of ancestors be pleased with

पुष्पाक्षतादिदानेन माहेश्वरनिमन्त्रणम्

नन्द्यादिसंज्ञिनां विश्वेदेवानां स्थानके तथा ।
महेश्वरादिसंज्ञानां पितृणां स्थानकेऽपि च ॥१०॥

संरक्षकस्य शम्भोश्च स्थाने पुष्पाक्षतान् क्षणान् ।
दत्त्वा ब्रूयात् प्रसादश्च भवद्भिः कार्य इत्यपि ॥११॥

निमन्त्रिता मौनयुजो मद्ध्यानासक्तचेतसः ।
तृप्तिमन्तश्च वर्तेरन् न चेन्निरयमाप्नुयुः ॥१२॥

मण्डलद्वयरचनम्

पादार्चनाय रचयेद् बाह्यमान्तरमेव वा ।
अरङ्गमेति मन्त्रेण मण्डलद्वितयं तथा ॥१३॥

मध्ये तयोरन्तरेण कर्तव्यं वै षडङ्गुलम् ।
यथा पादोदकस्पर्शो न भवेत् पितृदेवयोः ॥१४॥

मण्डलद्वयमारच्य पाद्यार्थं पितृदेवयोः ।
तत्स्थाने भस्मगन्धाद्यैरर्चयेत् सकलैरपि ॥१५॥

By offering flower, rice and turmeric *(kṣaṇa)* to the place of Viśvadevas' viz. *Nandi, Mahākāla* etc. and ancestors like *Maheśvaras* etc. and also to the place of Śambhu – the protector, one should pray for grace (10-11). The invited *Māheśvaras* should observe silence with pleasant gesture contemplating on Me, lest they should fall downward (12).

Two kinds of *maṇḍalas* i.e. internal and external are to be drawn reciting the hymn *'araṅgam'*[2] for the purpose of worshipping the feet (13). There should be a distance equal to six fingers in between these two *maṇḍalas,* so that the water used for the washing of the feet does not touch the place meant for the ancestors and divinities (14). Offerings on the feet of ancestors and divine beings are to be dedicated after drawing two *maṇḍalas* and worship also is to be performed on the same place with the sacred ashes, incenses and other ingredients (15).

उत्तरापोशनं दत्त्वा करशुद्धेरनन्तरम् ।
उत्तरान् पाठयेन्मन्त्रान् श्रद्धायां प्राण आदिमान् ।।३८।।

अङ्गुष्ठमात्रः पुरुषो ह्यङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ।।३९।।

भोजनानन्तरमनुष्ठानक्रमः

इत्युक्त्वा तैराशिषश्चाक्षय्यमाराधनं त्विति ।
वाचयित्वा ऋचे त्वा पृथिवी शान्तेति चामनन् ।।४०।।

तान् त्रिः प्रदक्षिणं कृत्वा तैः स्वाहां च स्वधामपि।
वाचयित्वा ततो ब्रूयादुपचारान् यथोचितम् ।।४१।।

अद्य मे सफलं जन्म भवत्पादाभिवन्दनात् ।
अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद् दिवम् ।।४२।।

पत्रशाखादिदानेन क्लेशिता यूयमीदृशाः ।
तत् क्लेशजातं चित्तेषु विस्मृत्य क्षन्तुमर्हथ ।
इति प्रणम्य तेभ्यश्च गृहणीयादाशिषः पुनः ।।४३।।

---

should be requested to express explicitly that they were satisfied (37). One should get their hands washed after feeding them *(Māheśvara)* and ask them to recite the hymn *'śraddhāyām prāṇaḥ'* (38).

Human soul is of the size of thumb and is also existent on the thumb. God is the Lord of the world. Let the protector, the Lord of the world be pleased (39).

Let the *Māheśvara* bless by uttering, 'this worship (of the ancestors) performed by you be the bestower of imperishable results', and recite the hymns *'ṛce tvā'*[13] *'pṛthvī śāntā'* (40). Then he (performer) should go round the Māheśvaras three times, request them to utter *'svāhā'* and *'svadhā'* and address them in appropriate respectful language (41). 'My life has become blessed by worshipping your lotus feet, my ancestors have attained the heaven by your grace (42). I have given trouble by offering leaves, branches etc. to a great person like

माहेश्वरेभ्य आशीर्वचनग्रहणम्

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च
प्रयच्छन्तु तथा राज्यं प्रीत्या नृणां पितामहाः ।
इत्युक्त्वा गच्छतो विप्रानासीमान्तमनुव्रजेत् ।।४४।।

महालयाराधने च तीर्थाराधनके तथा ।
संकल्प एव भिद्येत प्रयोगे न भिधा भवेत् ।।४५।।

श्राद्धकर्मणि पित्राद्याराधनक्रमः

मातृणां वा पितृणां वा वर्गः प्रत्याब्दिके भवेत्
महालयाराधनादौ पित्राद्याः सर्व ईरिताः ।।४६।।

आदौ पिता तथा माता सापत्नी जननी तथा ।
मातामहाः सपत्नीका आत्मपत्न्यस्त्वनन्तरम् ।।४७।।

सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्यकाः ।
दुहिता भगिनी चैकदौहित्रो भागिनेयकः ।।४८।।

पितृष्वसा मातृष्वसा जामाता भावुकः स्नुषा ।
श्वशुरः स्यालकश्चैव स्वामी च गुरुरिक्थिनौ ।।४९।।

---

you. Kindly pardon me by wiping out those sufferings from your mind'. He should bow down before them and again seek their blessings by uttering these words (43).

'Let the ancestors bestow with joy the longevity, subjects, wealth, knowledge, heaven, liberation, various worldly pleasures and kingdom'. Uttering this one should see the *Māheśvaras* off upto the boundary of the premises (44). The difference between the worship of last rite and the worship of pilgrims is that of aim only, not in practice (45).

The lineage of mother and father are worshipped on the day of *Mahālayā* every year. This has been described in scriptures (46). Firstly father and mother are to be worshipped, then step mother, thereafter maternal grandfather with his wife, lastly one's own wives (47). Then comes the turn of the son, brother, uncle, maternal uncle, daughter, sister, son of the daughter and son of the sister are the next in order (48).

माहेश्वरालाभे विष्टरेषु सर्वं कर्तव्यम्

यत्नेऽपि सर्वथाऽलाभे माहेशानां महेश्वर ।
विष्टुरेषु निधायैव घण्टां वा भस्मघुण्टिकाम् ।
पादार्चनादिकं सर्वमाराधनमथाचरेत् ।।५०।।

भोज्यं च धेनवे दद्याद् विप्रेभ्यश्चैव दक्षिणाम् ।
कुर्वन्नेवं स लभत आराधनफलं महत् ।।५१।।

पित्राराधनफलकथनम्

विधिनाऽनेन कुरुते पित्रोराराधनं तु यः ।
आयुः श्रियं प्रजां लब्ध्वा शिवलोके महीयते ।।५२।।

अननुष्ठाने दोषः

नास्तिक्यादथवाऽऽलस्याद् यस्त्वेवं नानुतिष्ठति ।
काकयोनिशतं गत्वा स हि श्वा चाभिजायते ।।५३।।

इति श्रीमकुटागमे चर्यापादे प्रत्याब्दिकविधिकथनं
नाम नवमः पटलः ।।९।।

Paternal aunt, maternal aunt, son -in-law, father of the daughter-in-law, brother-in-law, brother of the wife, master, teacher and the person from whom the money is borrowed come next (49).

O Maheśvara! despite of all efforts, if the *Māheśvaras* are not available, then all the rites of worship of the feet of ancestors should be accomplished on the *'Viṣṭar'* made up of *kuśā* and putting the bell and the ball of sacred ashes on it (50). The offering of food in the name of ancestors should be given to the cows and *'dakṣiṇā'* (offering in terms of money) to the brāhmins. One can also secure the great result of worship by performing it in the above process (51).

One who observes the worship for the parents as per the procedures laid down here, acquires a long life, wealth and all happiness of the children and achieves respect in the sphere of Śiva (52).

One who does not perform the rites of worship of the ancestors on account of being atheist or lethargic, takes the birth of a crow for hundred times and lastly is born as a dog (53).

Here ends the ninth chapter of the Caryāpāda of Makuṭāgama describing the procedure of the last rite to be performed yearly.

Notes and References

1. "नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमः" (*Mādhya.*, 16.24).
2. "तस्मे अरं गमात्म वो यस्य क्षयाय जिन्वथ। आपो जन्त्यथा च नः।। (*Mādhya.*, 11.52).
3. "शं नो देवीरमिष्ट्य आपो भवन्तु पीतये। शं योर मिस्रवन्तु नः।।" (*Mādhya.*, 36.12).
4. "विंशत्तन्तुकृता वेणी बहिर्षां विष्टरः स्मृतः" (*Kriyāpāda* 6.5). It is stated in *Mṛgendrāgama* that the systematic combination of twenty fibres of *Kuśā* is known as *'Viṣṭar'*
5. In vedic ritual, pouring of the unbroken flow of *ghee* from one corner to the other is called *'vyādhāraṇa'*. Same rite is named here as *'abhidhāraṇa'*.
6. See the note no. 7 of the second chapter of *Kriyāpāda*.
7. "देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। दिन्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु स्वाहा।।" (*Mādhya.*, 9.1).
8. "पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि स्वाहा"।
9. See verse 39.
10. "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।।" (*Mādhya.*, 3.60).
11. "श्रद्धायां प्राणे निविश्यामृतं हुतं प्राणमन्नेनाप्यायस्व" (*Mahānārāyaṇopaniṣad*, p. 39).
12. "मधुवाता ऋतायते, मधुनक्तमुतोषसः, मधुमान्नो वनस्पतिः" (*Mādhya.*, 13,pp.27-29) — these three hymns have here been referred to.
13. "ऋचे त्वा रूचे भासे त्वा ज्योतिषे त्वा" (*Mādhya.*, 13.39).

***

Chapter-10

दशमः पटलः

रुद्र उवाच

अशेषजगदाधार निराधार कृपानिधे ।
ममास्ति विशयः कश्चिदाशौचविषये विभो ॥१॥

शाम्भवव्रतशुद्धेषु कथमाशौचसंगतिः ।
भवद्भावनया त्यक्तगात्रेषु व्रतसेविषु ॥२॥

अमृतेषु कथं नु स्यात् तनोराशौचसंगमः ।
एनं मे संशयं छिन्धि सर्वज्ञानैकसागर ॥३॥

परशिव उवाच

साधु पृष्टं त्वया वत्स सद्भक्तानुजिघृक्षुणा ।
तद् गोप्यमपि वक्ष्यामि सावधानमनाः शृणु ॥४॥

शाम्भवव्रतनिष्ठानामप्याशौचावाप्तिः

शाम्भवव्रतशुद्धानां मत्सेवाभिरतात्मनाम् ।
मुक्तिभाजां तनुत्यागहेतुकाशौचसंगमः ।
यद्यप्यसम्भाव्य एव प्राणिदोषाप्रकाशनात् ॥५॥

Rudra enquires —

O Parama Śiva, the boundless basis of the universe and at the same time baseless ocean of mercy, the all pervasive! I have got some doubts regarding the eradication of the state of impurity (1). How the persons who are purified with the practice of *Śāmbhavavrata* are touched with impurity, as they leave their bodies observing the *Śāmbhavavrata* and in constant meditation? (2). They attain immortality. How the impurities be associated with the bodies of such persons? O the ocean of all wisdom! Kindly remove my doubts (3).

Paraśiva replies —

O son! you have asked an appropriate question for showering mercy on the honest devotees, though the answer of this question is quite secret, but I shall explain it to you. Please listen to it carefully (4).

तथापि तेषां संसारसम्बद्धतनुयोगिनाम् ।
देहोत्पत्तिविनाशोत्थमाशौचमिह विद्यते ।
यतीनां तद्धि संसारयोगाभावान्न युज्यते ।।६।।

तस्मात् संसारसम्पर्को हेतुराशौचसंगतेः ।
तद्योगादस्ति व्रतिनामाशौचमिति निश्चिनु ।।७।।

आशौचे विद्यमानेऽपि नान्तरायोऽर्चने

आशौचे विद्यमानेऽपि नान्तरायोऽर्चनस्य तु ।
मदर्चा विघ्नविच्छेत्री दीक्षासामर्थ्ययोगतः ।।८।।

नैमित्तिकानां नित्यानामन्येषां कर्मणां पुनः ।
आशौचमूलसंकोचस्तुल्य एव ह्यदीक्षितैः ।।९।।

आत्मन्यारोपिता येन ह्यग्नयः सोमपीथिना ।
उत्क्रान्तेरेव तस्य स्यादाशौचं ज्ञातिषु ध्रुवम् ।।१०।।

The person who always remains pure by observing *Śāmbhavavrata* and keeps himself engrossed in my service, is capable of attaining liberation because such person is free from the possibility of contacting the impurity after death because he is not affected by the impurities like other beings (5). Still for such *yogī* who is associated with the world, impurities on account of birth and death is sure to occur. The sage who is unassociated with the world, remains unaffected with this impurity (6). Attachment with the world is the main cause for the contact of the impurity. If the performer of *Śāmbhavavrata* remains attached with the worldly affairs, then know it for certain that he will be affected by the impurities caused by the birth and death (7).

Despite the state of impurity, worshipping Me is not supposed to be obstructed, because the *dīkṣā* (initiation) bestowed by *guru* is capable of removing all impediments (i.e. nothing can create any obstruction in worshipping *Śivaliṅga* i.e. *Iṣṭaliṅga*) (8). But as for the *'nitya'* and *'naimittika'* and other *karmas* (regular actions and rites on special occasion), the initiated has to observe the same rules and regulations concerning the state of impurity as the non-initiated person (9). One who has infused fire in himself by performing the sacrifice of

आशौचद्वैविध्यं चातुर्विध्यं च

जातकं मृतकं चेति ह्याशौचं द्विविधं स्मृतम् ।
तच्चतुर्धाऽल्पमधिकमपूर्णं पूर्णमित्यपि ।।११।।

अल्पकालिकमल्पं स्यादधिकं कालतोऽधिकम् ।
अपूर्णं स्यात् त्रिरात्रादि दशाहादि तु पूर्णकम् ।।१२।।

ज्ञातीनां दम्पत्योः सोदराणां वर्णानां चाशौचकालः

स्रावे मातुस्त्रिरात्रं स्याज्ज्ञातीनां तन्न विद्यते ।
पाते मातुर्मासंख्यं पित्रादीनां दिनत्रयम् ।।१३।।

दशाहमुक्तं विप्रस्य द्वादशाहं नृपस्य तु ।
विशः पञ्चदशाहं तु मासः शूद्रस्य सम्मतम् ।।१४।।

दशाहे समतिक्रान्ते जाताशौचं न विद्यते ।
पुत्रस्य जन्म श्रुत्वा तु जलमाप्लुत्य शुद्ध्यति ।।१५।।

'som', even the demise *(utkrānti)* of such person is sure to cause the state of impurity to the relations and friends (10).

Impurity is said to be of two kinds i.e. of birth and death which is again divided into four, such as short, long, complete and incomplete (11). The impurity that endures for short period is called 'short' and that prolongs for a longer period is named as 'long'. Impurity for three nights is called 'incomplete' and the impurity that lasts for ten days is called 'complete' (12).

In case of abortion[1], mother is affected for three days' impurity, but the other relations are not supposed to be affected by the impurity. In case of abortion, the duration of impurity for the mother depends on the duration of the pregnancy, where as for father, it is only for three days (13). The duration of impurity is ten days for the brahmin, twelve days for the *kṣatrīya,* fifteen days for the *vaiśyas* and one month for the *Śudras* (14). If one is informed about the birth after ten days, then he is not affected by any impurity, but in case of receipt of information of the birth of his own son, (even after ten days) he should bathe in water in order to attain immediate purification (15). If the child expires just

जाते मृते तु ज्ञातीनां सद्यः शुद्धिर्विधीयते ।
दशाहेनैव दम्पत्योः सोदराणां तथैव च ।।१६।।

अजातदन्तादिषु मृतेष्वाशौचकालः

शिशावजातदन्ते तु सद्यः शौचं विधीयते ।
बाले त्वकृतचौले तु स्यादहोरात्रमात्रकम् ।।१७।।

बालस्योपनयात् पूर्वं मातापित्रोस्त्रिरात्रकम् ।
मरणे तूपनीतानामाशौचं पूर्णमीरितम् ।।१८।।

ज्ञातीनां स्याद्दशाहं तु सोदकानां त्रिरात्रकम् ।
सगोत्राणां स्नानमात्रं तदन्येषां न विद्यते ।।१९।।

मातुलादिषु मृतेष्वाशौचविधिः

मृतौ तु मातुलादीनां त्रिरात्रमिति चोदितम् ।
मरणे बान्धवानां तु पक्षिण्याशौचमीरितम् ।।२०।।

आ त्रिमासात् त्रिरात्रं स्यादा षण्मासात्तु पक्षिणी
आ वत्सरादहोरात्रं ततः स्नानेन शुद्ध्यति ।।२१।।

---

after the birth, then relatives get purified at once, but the parents and brothers attain purification after ten days (16).

If the child expires before teething, then also the relatives are purified at once. If the child expires before the ritual of hair-cut, then the impure state should be observed for only day and night (17). If the son expires before having the sacred thread ceremony, then the parents should observe impurity for three nights and if he dies after having the sacred thread ceremony, then full time impurity of ten days should be observed (18). Regarding the above, kins should observe the state of impurity for full ten days, near relatives three nights[2], the person of the same lineage should only take bath for purification; for later generation and for others no purification is required (19).

On the expiry of maternal uncle etc. three nights' impurity and on the death of kins and friends two days' impurity should be observed (20). If the news of expiry is received after three months, then three

बहूनामाशौचानां तन्त्रेण शुद्धिः

बहूनामपि सम्प्राप्तौ तन्त्रेणैव हि शुद्ध्यति ।
समानमल्पकं वाऽपि प्रथमेन समापयेत् ।।२२।।

मरणाशौचस्य प्राधान्यम्

जातके मृतकं वाऽपि मृतके वाऽपि जातकम्।
यदि स्यान्मृतकस्यैव प्राधान्यं परिकीर्तितम् ।
पित्रोस्तु मरणाशौचमन्याशौचस्य बाधकम् ।।२३।।

पितुर्दशाहमध्ये तु माता यदि मृता भवेत् ।
